CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 463 Subject: ~~Vedic Rit~~ Kāmaśāstra

Title: Kāmasutra.

Author: Vātsyāyana Scribe: —

Date of the work: — Date of the Ms.: fairly old

Place of the work: — Place of the Ms.: —

Size: 10.6" by 4" Extent: 55 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

॥ श्रीगणेशाय नमः॥ ॥ॐ धर्मार्थकामेभ्यो नमः॥ ॥शास्त्रे प्रकृतत्वात्। तत्समयावबोधकेभ्यश्चाचार्येभ्यस्त
त्। प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबंधनं त्रिवर्गस्य शासनमध्यायानां शतसहस्रेणाग्रे प्रोवाच। तस्यैकदेशं स्वा
मनुर्धर्माधिकारिकं पृथक् चकार। बृहस्पतिरर्थाधिकारिकं। महादेवानुचरश्च नंदी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवा
च। तदेव तु पंचभिरध्यायशतैरौद्दालकिः श्वेतकेतुः संचिक्षेप। तदेव तु पुनरध्यर्धेनाध्यायशतेन साधारणसांप्रयोगिककन्यासंप्र
युक्तकभार्याधिकारिकपारदारिकवैशिकौपनिषदिकैः सप्तभिरधिकरणैर्बाभ्रव्यः पांचालः संचिक्षेप। तस्य षष्ठं वैशिक
मधिकरणं पाटलिपुत्रिकाणां गणिकानां नियोगाद्दत्तकः पृथक् चकार। तत्प्रसंगाच्चारायणः साधारणमधिकरणं पृथगुवाच।
सुवर्णनाभः सांप्रयोगिकं [illegible]। घोटकमुखः कन्यासंप्रयुक्तकं। गोनर्दीयो भार्याधिकारिकं। गोणिकापुत्रः पा
रदारिकं। कुचुमार औपनिषदिकं। एवं बहुभिराचार्यैस्तच्छास्त्रं खंडशः प्रणीतमुत्सन्नकल्पमभवत्। तत्र दत्तकादिभिः प्रणीतानां
शास्त्रावयवानामेकदेशत्वान्म [illegible] त्वाद्बाभ्रवीयस्य दुरध्येयत्वात् संक्षिप्य सर्वमल्पेन ग्रंथेन कामसूत्रमिदं प्रणीतं। तस्यायं प्र

स करणाधिकरणसमुद्देशः। शास्त्रसंग्रहः। त्रिवर्गप्रतिपत्तिः। विद्यासमुद्देशः। नागरिकवृत्तं। नायकसहायदूतीकर्मविमर्शः। इति
साधारणं प्रथममधिकरणं ॥१॥ अध्यायाः पंच। प्रकरणानि पंच। प्रमाणकालभावेभ्यो रतावस्थापनं। प्रीतिविशेषाः। आलिं
गनविचाराः। चुंबनविकल्पाः। नखरदनजातयः। दशनच्छेद्यविधयः। देश्या उपचाराः। संवेशनप्रकाराः। चित्ररतानि। प्रहणनयो
गाः। तद्युक्ताश्च सीत्कृतोपक्रमाः। पुरुषायितं। पुरुषोपसृप्तानि। औपरिष्टकं। रतारंभावसानिकं रतविशेषाः प्रणयकलहः। इ
ति सांप्रयोगिकं द्वितीयमधिकरणं ॥२॥ अध्यायाः दश। प्रकरणानि सप्तदश। वरणविधानं। संबंधनिर्णयः। कन्याविस्रंभणं। बाला
या उपक्रमाः। इंगिताकारसूचनं। एकपुरुषाभियोगः। प्रयोज्यस्योपावर्तनं। अभियोगतश्च कन्यायाः प्रतिपत्तिः। विवाहयोगः। इति
कन्यासंप्रयुक्तकं तृतीयमधिकरणं ॥३॥ अध्यायाः पंच। प्रकरणानि नव। एकचारिणीवृत्तं। प्रवासचर्या। सपत्नीषु ज्येष्ठावृत्तं। कनि
ष्ठावृत्तं। पुनर्भूवृत्तं। दुर्भगावृत्तं। आंतःपुरिकं। पुरुषस्य बह्वीषु प्रतिपत्तिः। इति भार्याधिकारिकं चतुर्थमधिकरणं ॥४॥ अध्यायौ द्वौ।
प्रकरणान्यष्टौ। स्त्रीपुरुषशीलावस्थापनं। व्यावर्तनकारणानि। स्त्रीषु सिद्धाः पुरुषाः। अयत्नसाध्या योषितः। परिचयकारणानि। अ

योगाः। भावपरीक्षा। दूतीकर्माणि। ईश्वरकामितं। अंतःपुरिकं दाररक्षितकं॥ ॥इति पारदारिकं पंचममधिकरणं॥५॥ ॥
ध्यायाः षट्। प्रकरणानि दश। गम्यचिंता गमनकारणानि उपावर्तनविधिः। कांतानुवृत्तं। अर्थागमोपायाः विरक्तलिंगानि। विर-
प्रतिपत्तिः निष्कासनक्रमाः विशीर्णप्रतिसंधानं। लाभविशेषः अर्थानर्थानुबंधसंशयविचारः। वेश्याविशेषाश्च॥ ॥इति वैशि-
कं षष्ठमधिकरणं॥६॥ अध्यायाः षट्। प्रकरणानि द्वादश। सुभगंकरणं वशीकरणं वृष्याश्च योगाः॥ नष्टरागप्रत्यानयनं वृद्धि-
विधयः। चित्राश्च योगाः॥ इत्यौपनिषदिकं सप्तममधिकरणं॥७॥ ॥अध्यायौ द्वौ प्रकरणानि षट्॥ एवं षट्त्रिंशदध्यायाश्चतुःषष्टिः
प्रकरणानि। अधिकरणानि सप्त। सपादं श्लोकसहस्रमिति शास्त्रसंग्रहः। संक्षेपमिममुक्त्वास्य विस्तरोऽतः प्रवक्ष्यते। इष्टं हि वि-
दुषां लोके समासव्यासभाषणं॥ ॥इति वात्स्यायनीये कामसूत्रे साधारणे प्रथमेऽधिकरणे शास्त्रसंग्रहः प्रथमोऽध्यायः॥ ॥१॥ ॥
शतायुर्वै पुरुषो विभज्य कालमन्योन्यानुबद्धं परस्परस्यानुपघातकं त्रिवर्गं सेवेत॥ बाल्ये विद्याग्रहणादीनर्थान्॥ कामं च यौवने
स्थाविरे धर्मं मोक्षं च। अनित्यत्वादायुषो यथोपपादं वा सेवेत॥ ब्रह्मचर्यमेव त्वा विद्याग्रहणात्॥ अलौकिकत्वाददृष्टार्थत्वादप्र-

वृत्तानां शास्त्रात् प्रवर्तनं लौकिकत्वाद् दृष्टार्थत्वाच्च प्रवृत्तेभ्यश्च मांसभक्षणादिभ्यः शास्त्रादेव निवारणं धर्मः॥ तं श्रुतेर्धर्मज्ञसम-
वायाच्च प्रतिपद्येत॥ विद्याभूमिहिरण्यपशुधान्यभांडोपस्करमित्रादीनामर्जनमर्जितस्य रक्षणं रक्षितस्य विवर्द्धनमर्थः॥ तमध्य-
क्षप्रचारात् वार्तासमयविद्भ्यो वणिग्भ्यश्चेति॥ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विष-
येष्वानुकूल्यतः प्रवृत्तिः कामः॥ स्पर्शविशेषविषये त्वस्याभिमानिकसुखानुविद्धा फलवत्यर्थप्रतीतिः प्राधान्यात्कामः॥ तं काम-
सूत्रान्नागरिकजनसमवायाच्च प्रतिपद्येत॥ एषां समवाये पूर्वः पूर्वो गरीयान्॥ अर्थश्च राज्ञः तन्मूलत्वाल्लोकयात्रायाः वेश्यायाः
कामश्चेति त्रिवर्गप्रतिपत्तिः॥ धर्मस्यालौकिकत्वात्तदभिधायकं शास्त्रं युक्तं उपायपूर्वकत्वादर्थसिद्धेरुपायप्रतिपत्तिश्च शा-
स्त्रात्॥ तिर्यग्योनिष्वपि तु स्वयं प्रवृत्तत्वात्कामस्य नित्यत्वाच्च शास्त्रेण कृत्यमस्तीत्याचार्याः॥ संप्रयोगपराधीनत्वात् उपायमपेक्ष-
ते। सा चोपायप्रतिपत्तिः कामसूत्रादिति वात्स्यायनः॥ तिर्यग्योनिषु पुनरनावृतत्वात् स्त्रीजातेश्च ऋतौ यावदर्थं प्रवृत्तेरबुद्धिपूर्व-
त्वाच्च प्रवृत्तीनामनुपायः प्रत्ययः॥ न धर्मांश्चरेदेष्यत्फलत्वात् सांशयिकत्वाच्च को ह्यबालिशो हस्तगतं परगतं कुर्यात्॥ वरमद्य कपोतः

नश्वोमयूरः वरंसांशयिकान्निष्कादसांशयिकःकार्षापणइतिलौकायतिकाः।शास्त्रस्यानभिशंक्यत्वादभिचारानुव्याहारयोःक्व
चित्फलदर्शनान्नक्षत्रसूर्यचंद्रताराग्रहचक्रस्यलोकानुग्रहार्थंबुद्धिपूर्वकमिवप्रवृत्तेर्दर्शनात्।वर्णाश्रमाचारस्थितिलक्षणत्वाच्च
कपात्रायाहस्तगतस्यबीजस्यभविष्यतःसस्यार्थेत्यागदर्शनाच्चरेद्धर्मानितिवात्स्यायनः।।नार्थांश्चरेत्प्रयत्नतोपिह्येतेनुष्ठी
यमानानैवकदाचित्स्युःनरननुष्ठीयमानाअपियदृच्छयाभवेयुःसर्वंकालकारितमितिकालएवहिपुरुषानर्थानर्थयोर्जयपरा
जययोःसुखदुःखयोश्चस्थापयति।कालेनबलिरिंद्रःकृतःकालेनव्यपरोपितःकालएवपुनरप्येनंकर्तेतिकालकारणिकाः।पुरु
षकारपूर्वकत्वात्सर्वप्रवृत्तीनामुपायःप्रत्ययः।अवश्यंभाविनोप्यर्थस्योपायपूर्वकत्वान्ननिष्कर्मणोभद्रमस्तीतिवात्स्यायनः।न
कामांश्चरेद्धर्मार्थयोरेवप्रधानयोरन्येषांचसतांप्रत्यनीकत्वात्।अनर्थजनसंसर्गमसद्व्यवसायमशौचमनायतिंचैतेपुरुषस्य
जनयंति।तथाप्रमादंलाघवंअप्रत्ययमग्राह्यतांच।किंचबहवःकामवशगाःसगणाएवविनष्टाःश्रूयंते।यथादांडक्योनामभो
जःकामाद्ब्राह्मणकन्यकामभिमन्यमानःसबंधुराष्ट्रोविननाश।देवराजश्चाहल्यां।अतिबलःकीचकोद्रौपदीं।रावणःसीतां।एतेचा

न्येचबहवोदृश्यंतेकामवशगाविनष्टाइत्यर्थचिंतकाः।शरीरस्थितिहेतुत्वादाहारसधर्माणोहिकामाःफलभूताश्चधर्मार्थयोः।
बोद्धव्यंतुदोषेष्विव।नहिभिक्षुकाःसंतीतिस्थाल्योनाधिश्रीयंते।नहिमृगाःसंतीतियवानोप्यंतेइतिवात्स्यायनः।।एवमर्थंचकामंचध
का र्मंचोपाचरन्नरः।इहामुत्रचनिःशल्यमत्यंतंसुखमश्नुते।।किंस्यात्परत्रेत्याशंकाकार्येयस्मिन्नजायते।नचार्थघ्नंसुखंचेतिशिष्टास्तत्रव्यव
स्थिताः।।त्रयाणांसाधकंयत्स्याद्द्वयोरेकस्यवापुनः।कार्यंतदपिकुर्वीतनत्वेकार्थंद्विबाधकं।। ।।इतिश्रीवात्स्यायनीयेकामसूत्रेसाधा
विद्या रणेप्रथमेधिकरणेत्रिवर्गप्रतिपत्तिर्द्वितीयोध्यायः।। ।।२।। ।।धर्मार्थांगविद्याकालाननुपरोधयन्कामसूत्रंतदंगविद्याश्चपुरुषोधी
यीत।प्राग्यौवनात्स्त्री।प्रत्ताचपत्युरभिप्रायात्।योषितांशास्त्रग्रहणस्याभावादनर्थकमिहशास्त्रेस्त्रीशासनमित्याचार्याः।प्रयो
च गग्रहणंत्वासांप्रयोगस्यचशास्त्रपूर्वकत्वादितिवात्स्यायनः।नकेवलमिहैवसर्वत्रैवहिलोकेकतिचिदेवशास्त्रज्ञाःसर्वजनविष
यश्चप्रयोगः।प्रयोगस्यचदूरस्थमपिशास्त्रंहेतुः।अस्तिव्याकरणमित्यवैयाकरणाअपियाज्ञिकाऊहंक्रतुषुसाधुशब्दान्प्रयुं
जते।अस्तिज्योतिषमितिपुण्याहेषुकर्मकुर्वते।तथाश्वारोहहस्त्यारोहाश्चगजानश्वांश्चानधीतशास्त्राअपिविनयंते।तथास्तिराजेति

स्त्रा । अपिजनपदानानिवर्त्ततेदुर्मिनद्देन्नं । सत्यपिखलुशास्त्रेग्रहणंतुदुष्प्रयोगाणिकाराजपुत्र्योमहामात्रदुहितरश्च । तस्माद्वैश्यासि
जनाद्रहसिप्रयोगान्शास्त्रमेकदेशंवास्त्रीगृह्णीयात् । अभ्यासप्रयोज्यांश्चचातुःषष्टिकान्योगान्कन्यारहस्येकािन्यम
त् । आचार्यास्तुकन्यानांप्रवृत्तपुरुषसंयोगासहसंवृद्धाधात्रेयिकातथानिरत्ययभाषणासखीसवयाश्चमातृष्वसाविश्रब्धातत्स्थ
नीयापुराणदासीपूर्वसंसृष्टाभिक्षुकीस्वसाचविश्वासप्रयोगात् । तत्रयथा । गीतंवाद्यंनृत्यंआलेख्यंविशेषकच्छेद्यं । तंडुलकुसुमबालि
विकाराः । पुष्पास्तरकाः । दशनवसनांगरागाः । मणिभूमिकाकर्म । शयनरचनं । उदकवाद्यं । उदकघातः । चित्राश्चयोगाः । माल्यग्रथन
विकल्पाः । शेखरापीडयोजना । नेपथ्यसंप्रयोगाः । कर्णपत्रभंगाः । गंधयुक्तिः । भूषणयोजनं । ऐंद्रजालः । कुचुमाराश्चयोगाः । हस्तलाघ
वं । चित्रशाकयूपभक्ष्यविकारक्रियाः । पानकरसासवरागयोजना । निःसूचीवानकर्माणि । सूत्रक्रीडा । वीणाडमरुकवाद्यानि । प्रहेलि
का । प्रतिमाला । दुर्वाचकयोगाः । पुस्तकवाचनं । नाटकाख्यायिकादर्शनं । काव्यसमस्यापूरणं । पट्टिकावेत्रवानविकल्पाः । तर्कुकर्माणि ।
तक्षणं । वास्तुविद्या । रूप्यरत्नपरीक्षा । धातुवादः । मणिरागाकरज्ञानं । वृक्षायुर्वेदयोगाः । मेषकुक्कुटलावकयुद्धविधिः । शुकसारिका

प्रलापनं । उत्सादनेकेशमर्दनेचकौशलं । अक्षरमुष्टिकाकथनंम्लेछितविकल्पाः । देशभाषाविज्ञानं । पुष्पशकटिका । यंत्रमातृ
का । धारणमातृका । संपाठ्यंमानसी । चिंताकाव्यक्रिया । अभिधानकोशछंदोविज्ञानं । क्रियाविकल्पाः । छलितकयोगाः । वस्त्रगोपना
नि । द्यूतविशेषाः । आकर्षक्रीडा । बालक्रीडनकानि । वैनयिकीनांवैजयिकीनांव्यायामिकीनांचविद्यानांज्ञानं । इतिकामसूत्रांगविद्याः ।
पांचालिकीचतुःषष्टिरपरा । तस्याःप्रयोगानन्वेक्ष्यसांप्रयोगिकेवक्ष्यामः । तदात्मकत्वात्संयोगस्य । आभिरभ्युच्छ्रितावेश्याशीलरू
पगुणान्विता । लभतेगणिकाशब्दंस्थानंचजनसंसदि । पूजितासासदाराज्ञागुणवद्भिश्चसंस्तुता । प्रार्थनीयाभिगम्याचलक्ष्यभूता
चजायते । योग[illegible]ज्ञाराजपुत्रीमहामात्रसुतातथा । सहस्रांतःपुरमपिस्ववशेकुरुतेपतिं । तथापतिवियोगेचव्यसनंदारुणंगता । दे
शांतरेपिविद्याभिःसासुखेनैवजीवति । कलानांग्रहणादेवसौभाग्यमुपजायते । देशकालौत्वपेक्ष्यासांप्रयोगःसंभवेन्नवा । नरः
कलासुकुशलोवाचालश्चाटुकारकः । असंस्तुतोपिनारीणांचित्तमाश्वेवविंदति ॥ ॥ इतिसाधारणेप्रथमाधिकरणेविद्यासमु
देशस्तृतीयोध्यायः ॥ ॥ गृहीतविद्यःप्रतिग्रहजयक्रयनिर्वेशाधिगतैरर्थैरन्वयागतैरुभयैर्वागार्हस्थ्यमधिगम्यनागरि

तंवेत्तेन।नगरेखर्वटेमहतिवासज्जनाश्रयेस्थानंयात्रायोगाद्वा।तत्रभवनमासन्नोदकं।वृक्षवाटिकावद्विभक्तकर्मकक्षंद्वि
गृहंकारयेत्।बाह्येचवासगृहेसुश्लक्ष्णमुभयोपधानंमध्येविनतंशुक्लोत्तरच्छदंबहुवितानंशयनीयंस्यात्।प्रतिशय्यिकाच
तस्यशिरोभागेकूर्चस्थानंवेदिकाच।तत्ररात्रिशेषमनुलेपनंमाल्यंसिक्थकरंडकं।सौगंधिकपुटिका।मुखवासकंमातुलिंग
त्वचः।तांबूलानिचस्युः।भूमौपतद्ग्रहः।नागदंतावसक्तावीणा।चित्रफलकं।वर्तिकासमुद्गकः।यःकश्चित्पुस्तकः।कुरंटकमालाश्च।
नातिदूरेभूमौवृत्तास्तरणं।समस्तकंआकर्षफलकं।द्यूतफलकंच।तस्यबहिःक्रीडाशकुनिपंजराणि।एकांतेचतक्षणतक्षणस्था
नमन्यासांचक्रीडानां।स्वास्तीर्णाप्रेंखादोलावृक्षवाटिकायांस्थंडिलपीठिकाचकुसुमेतिभवनविन्यासः।सप्रातरुत्थायकृत स
नियतकृत्योगृहीतदंतधावनोमात्रयानुलेपनंधूपंस्रजमितिगृहीत्वादत्वासिक्थकमलक्तकंचदृष्ट्वादर्शेमुखंगृहीतमुखवा
सतांबूलःकार्याण्यनुतिष्ठेत्।नित्यंस्नानं।द्वितीयमुत्सादनं।तृतीयकःफेनकः।चतुर्थकमायुष्यं।पंचमकंदशमकंवाप्रत्यायु रा॰ व
ष्यमित्यहीनं।सातत्याच्चसंवृतकक्षःस्वेदापनोदः।पूर्वापराह्णभोजनं।सायंचारायणस्यभोजनानंतरंशुकसारिकासारिकाप्रला ५

पनव्यापाराः।लावकमेषकुक्कुटयुद्धानि।तास्ताश्चकलाक्रीडाः।पीठमर्दविटविदूषकेष्वायत्ताव्यापाराः।दिवाशय्याच।गृही
तप्रसाधनस्यापराह्णेगोष्ठीविहाराः।प्रदोषेचसंगीतकानि।तदंतेचप्रसाधितेवासगृहेसंचारितसुरभिधूपेससहायस्यशय्याया
मभिसारिकाणांप्रतीक्षणं।दूतीनांप्रेषणंस्वयंवागमनं।आगतानांचमनोहरैरालापैरुपचारैःससहायस्योपक्रमाः।वर्षप्रमृष्ट
नेपथ्यानांदुर्दिनाभिसारिकाणांस्वयमेवपुनर्मंडनं।मित्रजनेनवापरिचरणमित्यहोरात्रिकं।घटानिबंधनं।गोष्ठीसमवायः।स
मापानकं।उद्यानगमनं।समस्याःक्रीडाश्चप्रवर्तयेत्।पक्षस्यमासस्यवाप्रज्ञातेहनिसरस्वत्याभवननियुक्तानांनित्यसमाजः।कु
शीलवाश्चागंतवःप्रेक्षणकमेषांदद्युः।द्वितीयेहनितेभ्यःपूजानियतंलभेरन्।ततोयथाश्रद्धमेषांदर्शनमुत्सर्गोवाव्यसनोत्सवेषुपरस्पर
स्यैककार्यता।आगंतूनांचकृतसमवायानांपूजनमभ्युपपत्तिश्चेतिगणधर्मः।एतेनतंतंदेवतामुद्दिश्यसंभावितस्थितयोविविधा विशेष
घटाव्याख्याताः।वेश्याभवनेचसभायामन्यतमस्योदवसितेचसमानविद्याशीलबुद्धिवित्तवयसांसहवेश्याभिरनुरूपैरालापैरा
सनबंधोगोष्ठी।तत्रचैषांकाव्यसमस्याकलासमस्याच।तस्यामुज्ज्वललोककांताःपूज्याः।प्रीतिसमानाश्चाहारिताःपरस्परभव

नेषु च। पानकानि। तत्र मधुमैरेयसुरासवान्विविधवल्कलसंभववनफलहरितकदुर्कम्लोपदंशान्वेश्यापाययेयुरनुपिबेयुः
एतेनोद्यानगमनं व्याख्यातं। तत्र पूर्वाह्न एव स्वलंकृतास्तुरगाधिरूढा वेश्याभिः सह परिचारकैरनुगता गच्छेयुः। दैवसिकीं च या
त्रां चानुभूय कुक्कुटलावकमेषयुद्धद्यूतैः प्रेक्षाभिरनुकूलैश्च चेष्टितैः कालं गमयित्वा गृहीतोद्यानोपभोगचिह्नास्तथैव च प्रत्याव्र
जेयुः। एतेन रचितोद्ग्राहोदकानां ग्रीष्मे जलक्रीडागमनं व्याख्यातं। पक्षरात्रिः। कौमुदीप्रचारः। सुवसंतकः। सहकारभंजिका। अभ्यू
षखादिका। बिसखादिका। नवपत्रिका। उदकक्ष्वेडिका। पंचालानुयानं। एकशाल्मली। स्त्रहयंतीत्रं। यवचतुर्थी। आलोलचतुर्थी।
मदनोत्सवः। मदनभंजिका। होलाका। अशोकोत्तंसिका। पुष्पावचायिका। कदंबयुद्धानि। चूतलतिका। इक्षुभंजिका। नास्ताश्वमा हिम
न्यो देशपाश्च क्रीडा जनेभ्यो विशिष्टतरमाचारमौरवयेयुरिति संभूय क्रीडा। एकचारिणश्च विभवसामर्थ्यात् गणिकाया नायिकाया
श्च सखीभिर्नागरिकैश्च सहचरितमनेन व्याख्यातं। अविभवस्तु शरीरमात्रो मल्लिकाफेनककषायमात्रपरिच्छेदः पूज्याद्देशादाग
तः कलासु विचक्षणस्तदुपदेशेन गोष्ठ्यां वेशोचितं साधयेदात्मानमिति पीठमर्दः। भुक्तविभवस्तु गुणवान्सकलत्रो गोष्ठ्या

रा
६

वेशे च बहुमतस्तदुपजीवी च विटः। एकदेशविद्यस्तु क्रीडनको विश्वास्यश्च विदूषको वैहासिको वा। एते वेश्यानां नागराणां च मं
त्रिणः संधिविग्रहनियुक्ताः। एतैर्भिक्षुक्यः कलाविदग्धा मुंडा वृषल्यो वृद्धगणिकाश्च व्याख्याताः। ग्रामवासी च बहुमतः सजाता
न्विचक्षणान्कौतूहलिकान्प्रोत्साह्य नागरिकजनस्य वृत्तं वर्णयन् श्रद्धां जनयन् तदेवानुकुर्वीत। गोष्ठीं प्रवर्तयन् संगत्यानुरंजयेत्
कर्मसु साहाय्येन चानुगृह्णीयादुपचारयेच्चेति नागरिकवृत्तं। नात्यंतं संस्कृतेनैव नात्यंतं देशभाषया। कथां गोष्ठीषु कथयन्लोके
बहुमतो भवेत्। या गोष्ठी लोकविद्विष्टा या च स्वैरविसर्पिणी। परहिंसात्मिका या च न तामवतरेद्बुधः। लोकचित्तानुवर्तिन्या क्रीडा
मात्रैककार्यया। गोष्ठ्या सहचरन्विद्वान्लोके सिद्धिं नियच्छतीति॥ ॥इति वात्स्यायनीये कामसूत्रे साधारणे प्रथमेऽधिकरणे चतु
र्थोऽध्यायः॥ ॥४॥ ॥नागरिकवृत्तं। कामश्चतुर्षु वर्णेषु सवर्णतः शास्त्रतश्चानन्यपूर्वायां प्रयुज्यमानः पुत्रीयो यशस्यो लौकिकश्च। तद्विप
रीत उत्तमवर्णासु परपरिगृहीतासु च प्रतिषिद्धः। अवरवर्णास्वनिरवसितासु वेश्यासु पुनर्भूषु च न शिष्टो न प्रतिषिद्धः। सुखार्थ
त्वात्। तत्र नायिकास्तिस्रः कन्या पुनर्भूर्वेश्या चेति। अन्यकारणवशात्परपरिगृहीतापि पाक्षिकी चतुर्थीति गोणिकापुत्रः। स यदा म

स्वैरिणीयमन्यतोपिबहुशःव्यवसितचारित्रातस्यांवेश्यायामिवगमनमुत्तमवर्णिन्यामपिनधर्मपीडाकारीति।पुनर्भूश्चेयम
न्यपूर्वनिकापिनात्रकाशांकितव्यःपतिंवामहांतमीश्वरमस्मदमित्रसंसृष्टमियमवगृह्यप्रभुत्वेनचरतिसामयासंसृष्टाने
देनंव्यावर्तयिष्यति।विरसंवाममयिशक्तमपकर्तुकामंचप्रकृतिमापादयिष्यति।तयाभिन्नीकृतेनमित्रकार्यममित्रप्रतीघातमन्य
द्वादुःप्रतिपादिकंकार्यंसाधयिष्यामि।संसृष्टोवाननयाहत्वास्याःपतिमस्माभाव्यमैश्वर्यमेनदधिगमिष्यामि।निरत्ययंवागमन
मस्याअर्थानुवंधिअहंचनिःस्वारस्वानुक्षीणवृत्त्युपायःसोहमनेनोपायेनधनमतिमहदकृच्छ्रादधिगमिष्यामि।मर्मज्ञावामयि
दृढमभिकामासामामनिच्छंतंदोषविख्यापनेनदूषयिष्यति।असद्भूतंवादोषंश्रद्धेयंदुःपरिहारंमयिक्षेप्स्यति।येनमेविनाशःस्या
त्।आयतिमंतंवावश्यंपतिमत्तोविभिद्यद्विषतोग्राहयिष्यति।स्वयंवातैःसहसंसृज्येतमदवरोधानांवादूषयितापतिरस्यास्तदह
मप्यस्यदारानेवदूषयन्प्रतिकरिष्यामि।राजनियोगाच्चांतर्वर्तिनंवारंवास्यनिर्हनिष्यामि।यामन्यांकामयिष्येसास्यावशगातामने रा॰
नक्रमेणाधिगमिष्यामि।कन्यामलभ्यांवात्माधीनामर्थरूपवतीमियंमयिसंक्रामयिष्यति।ममामित्रोवास्याःपत्यासहैकीभाव ७

मुपगतस्तमनयारसेनयोजयिष्यामि।इत्येवमादिभिःकारणैःपरस्त्रियमपिप्रकुर्वीतेतिसाहसिक्यंनकेवलंरागादेवेतिपरपरि
ग्रहगमनकारणानि।एतैरेवकारणैर्महामात्रसंबद्धाराजनैकदेशचारिणीकाचिदन्यावाकार्यसंपादिनीविधवापंचमीतिचारायणः।
सैवप्रव्रजितापष्ठीतिसुवर्णनाभः।गणिकायादुहितापरिचारिकावानन्यपूर्वासप्तमीतिघोटकमुखः।उत्क्रांतबालभावाकुलयुवति वा
रुपचारान्यत्वादष्टमीतिगोनर्दीयः।कार्यांतराभावादेतासामपिपूर्वास्वेवोपलक्षणंतस्माच्चतस्रएवनायिकाइतिवात्स्यायनः।
भिन्नत्वात्तृतीयाप्रकृतिःपंचमीत्येके।एकएवतुसार्वलौकिकोनायकः।प्रछन्नश्चद्वितीयोविशेषलाभात्।उत्तमाधममध्यमतां
तुगुणागुणतएवेषांविद्यात्।तांस्तूभयोरपिगुणागुणान्वैशिकेवक्ष्यामः।अगम्यास्त्वेवेमाः।कुष्ठिन्युन्मत्ताभिन्नरहस्यापतिताप्र
काशार्थिनीगतप्राययौवनातिश्वेतातिकृष्णादुर्गंधासंबंधिनीसखीप्रव्रजितासंबंधिसखिश्रोत्रियराजदाराश्चादृष्टपंचमपुरुषा
नागम्याकदाचिदस्तीतिबाभ्रवीयाः।संबंधिश्रोत्रियराजदारवर्जमितिगोणिकापुत्रः।सहपांशुक्रीडितमुपकारसंबद्धंसम
नशीलव्यसनंसहाध्यायिनंयश्चास्यमर्माणिरहस्यानिविद्याद्यस्यचायंधात्र्यपत्यंसहसंवृद्धंप्रपन्नपैतामहमविसंवादकदृष्टवै

वश्यंध्रुवमलोभशीलमपरिहार्यममंत्रस्रावीतिमित्रसंपत्।रजकनापितगोपालमालाकारगांधिकतांबूलिकशौंडिकभिक्षुकपी
मर्दविटविदूषकमित्रास्तद्योषितिमित्राश्चनागरिकाःस्युरितिवात्स्यायनः।यदुभयोःसाधारणमुभयत्रोदारंविशेषतोनायिकाये
श्वस्तंमित्रंमत्रदूतकर्म।पटुताधार्ष्टत्वमिंगिताकारज्ञानंअनाकुलत्वंपरममंत्रगुप्ताप्रतारणत्वंकालज्ञानंदेशज्ञानंकार्येषुविषह्यबुद्धि
त्वंलघ्वीप्रतिपत्तिःसोपायाचेतिदूतगुणाः।आत्मवान्मित्रवान्युक्तोभावज्ञोदेशकालवित्।अलभ्यामप्ययत्नेनस्त्रियंसंसाधये
न्नरः॥ ॥इतिसाधारणेप्रथमेधिकरणेपंचमोध्यायः॥ ॥नायकसहायदूतीविमर्शइतिसमाप्तंचेदंप्रथमाधिकरणम्॥ ॥५॥ ॥
शशोवृषोश्वइतिलिंगतोनायकविशेषाः।नायिकाःपुनर्मृगीवडवाहस्तिनीचेति।तत्रसदृशसंप्रयोगेसमरतानित्रीणि।विपर्ययेविषम
रतानिषट्।विषमेष्वपिपुरुषाधिक्यंचेदनंतरसंप्रयोगेद्वेउच्चरते।व्यवहितमेकमुच्चतररतं।विपर्ययेपुनर्द्वेनीचरते।व्यवहितमेकंनी
चतररतं।तत्रसमानिश्रेष्ठानि।तरशब्दांकितेद्वेकनिष्ठे।मध्यमानिशेषाणि।साम्येपिउच्चांकंनीचांकाज्ज्यायः।इतिप्रमाणतोनवर
तानि।यस्यसंप्रयोगकालेप्रीतिरुदासीनावीर्यमल्पंक्षतानिनसहतेसमंदवेगः।तद्विपर्ययोमध्यमचंडवेगौ।तथानायिकापि।अ

त्रापिप्रमाणवदेवनवरतानि।तद्वत्कालतोपिशीघ्रमध्यचिरकालानायिकाश्च।तत्रस्त्रियांविवादः।नस्त्रीपुरुषवद्भावमधिगच्छ
ति।सातत्यात्तस्याःपुरुषेणकंडूतिरपनुद्यते।सापुनराभिमानिकसुखेनसंसृष्टारसांतरंजनयतितस्मिंस्तुसुखबुद्धिरस्याः।पुरुषप्रती
तेश्चानभिज्ञत्वात्कथंतेसुखमितिप्रष्टुमशक्यत्वात्।कथमेतदुपलभ्यतइतिचेत्।पुरुषोहिमा गम्यस्वेच्छयाविरमतिनस्त्रियमपेक्ष
ते।नत्वेवंस्त्रीत्यौद्दालकिः।तत्रैतत्स्यात्।चिरवेगेहिनायकेस्त्रियोनुरज्यंते।शीघ्रवेगस्यचावसानेभ्यसूयिन्योभवंति।तत्सर्वंभाव
प्राप्तेरप्राप्तेश्चलक्षणमिति।तच्चन।कंडूतिप्रतीकारोपिहिदीर्घकालंप्रियइतितदुपपद्यतएव।तस्मात्संदिग्धत्वादलक्षणमिति।
संयोगेयोषितःपुंसाकंडूतिरपनुद्यते।तच्चाभिमानसंसृष्टंसुखमित्यभिधीयते।सातत्याद्युवतिरा रंभात्प्रभृतिभावमुपगच्छति
पुरुषःपुनरंतएव।तदुपपन्नतरं।नह्यसत्यांरतिप्राप्तौगर्भसंभवइतिबाभ्रवीयाः।अत्रापितावेवशंकापरिहारौभूयस्त
त्रैतत्स्यात्।सातत्येनरसप्राप्तावारंभकालेमध्यस्थचित्ततानातिसहिष्णुताचततःक्रमेणाधिकोरागयोगःशरीरेपिचनिरपेक्षत्वं।अं
तेचविरामाभीप्सेत्येतदनुपपन्नमिति।तच्चन।सामान्येपिभ्रांतिसंस्कारेकुलालचक्रस्यभ्रमरकस्यवाभ्रांतावेववर्तमानस्यप्रारंभेमं

वेगनाननश्चक्रेणाहरणं वेगस्येत्येतदुपपद्यते। धातुक्षयाच्च विरामाभीप्सेति। तस्माद[ना][illegible]क्षेयः सुरतान्ते सुखं पुंसां स्त्रीणां तु सततं
खं। धातुक्षयनिमित्ताच्च विरामेछोपजायते। तस्मात्पुरुषवदेव रसव्यक्तिर्योषितोऽपि दृष्टव्या। कथं हि समानायामेवाकृतनापेकार्थमभि[भि]
प्रपन्नयोः कार्यवैलक्षण्यं स्यादुपायवैलक्षण्यादभिमानवैलक्षण्याच्च। उपायवैलक्षण्यं च सर्गात्। कर्ता हि पुरुषोऽधिकरणं युवतिः
कर्त्ता अन्यथा क्रियां प्रतिपद्यते। अन्यथा चाधार इति। अभिमानवैलक्षण्यमप्युपायवैलक्षण्यादभियोक्ताहमिति पुरुषो रज्यते अ
भियुक्ताहमनेनेति युवतिरिति वात्स्यायनः। तत्रैतत्स्यादुपायवैलक्षण्यवदेव हि कस्मात्कार्यवैलक्षण्यमपि न स्यादिति। न च नाहे
तुमदुपायवैलक्षण्यं कर्त्राधारयोर्भिन्नलक्षणत्वाद्हेतु[illegible]मत्कार्यवैलक्षण्यमन्याय्यं स्यादाकृतेरभेदादिति। तत्रैतत्स्यात्संहत्यका
रकैरेकोऽर्थो हि निर्वर्त्यत इति पृथक्पृथक्परस्परस्तार्थसाधकौ पुनरिमौ न दृष्टुक्तमिति। तत्र न युगपदेकार्थसिद्धिरपि दृश्यते। तद्यथा। मेषयो
रभिघाते कपित्थयोर्भेदे मल्लयोर्नियुद्ध इति। न तत्र कारकभेद इति चेदिहापि न भेद इति। उपायवैलक्षण्यं तु सर्गादभिहितं पुरस्तात् राम ५१
ततो भयोरपि सदृशी सुखप्रतिपत्तिरिति। जातेरभेदाद्दम्पत्योः सदृशं सुखमिष्यते। तस्मात्तथोपचार्या स्त्री यथाग्रे प्राप्नुयादिति। स

वस्तु

द्द्वात्तस्य सिद्धत्वात्कालयोगान्यपि प्रमाणवदेव नव रतानि। रसो रतिः प्रीतिर्भावो रागो वेगः समाप्तिरिति पर्यायाः। संप्रयोगो रतं र
हः शायनं मोहनं मिति पर्यायाः। प्रमाणकालभावजानां संप्रयोगाणामेकैकस्य नवविधत्वात्तेषां व्यतिकरे सुरतसंख्या न शक्यते कर्तुमि
ति बहुत्वात्। तेषु तर्कादुपचारान्प्रयोजयेदिति वात्स्यायनः। प्रथमरते चण्डवेगता शीघ्रकालता च पुरुषस्य तद्विपरीतमुत्तरेषु। योषितः
पुनरेतदेव विपरीतमाधातुक्षयात्। प्राक् स्त्रीधातुक्षयात्पुरुषस्य धातुक्षय इति प्रायोवादः। मृदुत्वादुपमृद्यत्वान्निसर्गाच्चैव योषितः
प्राप्नुवन्त्याशु तां प्रीतिमित्याचार्या व्यवस्थिताः। एतावदेव युक्तानां व्याख्यातं सांप्रयोगिकं। मन्दानामवबोधार्थं विस्तारोऽतः प्रवक्ष्यते। अ
भ्यासादभिमानाच्च तथा संप्रत्ययादपि। विषयेभ्यश्च तन्त्रज्ञाः प्रीतिमाहुश्चतुर्विधां। शब्दादिभ्यो बहिर्भूता या कर्माभ्यासलक्षणा। प्रीतिः
साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु। अनभ्यस्तेष्वपि पुरा कर्मस्वविषयात्मिका। संकल्पाज्जायते प्रीतिर्या सा स्यादाभिमानिकी।
प्रकृतेर्या तृतीयस्याः स्त्रियाश्चैवोपरिष्टके। तेषु तेषु च विज्ञेया चुम्बनादिषु कर्मसु। नान्योऽयमिति यत्र स्यादन्यस्मिन्प्रीतिकारणे। तन्त्रज्ञैः
कथ्यते सापि प्रीतिः संप्रत्ययात्मिका। प्रत्यक्षा लोकतः सिद्धा या प्रीतिर्विषयात्मिका। प्रधानफलवत्त्वात्सा तदर्थाश्चेतरा अपि। एताः प्रीतीः

परामृश्यशास्त्रतःशास्त्रलक्षणाः।योयथावर्त्ततेभावस्तंतथैवप्रयोजयेत्॥ ॥इतिसांप्रयोगिकेद्वितीयेधिकरणेप्रथमोध्यायः॥ ॥प्र
णकालभावेभ्योरतावस्थापनंप्रीतिविशेषाइति॥ ॥आदितःषष्ठः॥ ॥संप्रयोगांगंचतुःषष्टिरित्याचक्षते।चतुःषष्टिप्रकरणं
तच्छास्त्रमिदंचतुःषष्टिरित्याचार्यवादः।कलानांचतुःषष्टित्वात्तासांचसंप्रयोगांगभूतत्वात्कलासमूहोवाचतुःषष्टिरिति।ऋचांदशा
नीयानांसंज्ञितत्वादिहापितदर्थसंबंधात्।पंचालसंबंधाच्चापिबह्वृचैरेषापूजार्थसंज्ञाप्रवर्त्तितेत्येके।आलिंगनचुंबनदशननख
च्छेद्यसंवेशनसीत्कृतपुरुषायितौपरिष्टकानामष्टधाविकल्पभेदादष्टावष्टकाश्चतुःषष्टिरितिबाभ्रवीयाः।विकल्पवर्गाणामष्टानां
न्यूनाधिकत्वदर्शनादिहप्रहणनविकल्पेनपुरुषोपसृप्तचित्ररतादीनामन्येषामपिवर्गाणामिहप्रवेशनात्प्रायोवादोयं।यथासप्तपर्णोवृ
वृक्षःपंचवर्णोबलिरितिवात्स्यायनः।तत्रासमागतयोःप्रीतिलिंगद्योतनार्थमालिंगनचतुष्टयं।स्पृष्टकं।विद्धकं।उद्घृष्टकं।पीडितकमि
ति।सर्वत्रसंज्ञार्थेनैवकर्मातिदेशाः।संमुखागतायांप्रयोज्यायामन्यापदेशेनगच्छतोगात्रेणगात्रस्यस्पर्शनंस्पृष्टकं।प्रयोज्यंस्थितमु राम
पविष्टंवाविजनेकिंचिद्गृह्णंतीपयोधरेणविध्येत्नायकोपितामवपीड्यगृह्णीयादितिविद्धकं।तदुभयमनतिप्रवृत्तसंभाषणयोः।तमसि १०

जनसंबाधेविजनेवाथशनकैर्गच्छतोर्नातिह्रस्वकालमुद्घर्षणंपरस्परस्यगात्राणामुद्घृष्टकं।तदेवकुड्यसंदंशेस्तंभसंदंशेवास्फु
टमवपीडयेदितिपीडितकं।तदुभयमवगतपरस्पराकारयोः॥लतावेष्टितकं।वृक्षाधिरूढकं।तिलतंडुलकं।क्षीरनीरकमितिचत्वारि
संप्रयोगे।लतेवशालमावेष्टयंतीचुंबनार्थंमुखमवनमयेत्।उद्धृत्यमंदसीत्कृतातमाश्रितावाकिंचिद्रामणीयकंपश्येत्तल्लतावेष्टित
कं।चरणेनचरणमाक्रम्यद्वितीयेनोरुदेशमाक्रमंतीवेष्टयंतीवातत्पृष्ठासक्तैकबाहुर्द्वितीयेनांसमवनमयंतीईषत्सीत्कृतांतःश्वसित
कूजिताचुंबनार्थमेवाधिरोढुमिच्छेदितिवृक्षाधिरूढकं।तदुभयंस्थितकर्म।शयनगतावेवोरुव्यत्यासंभुजव्यत्यासंचससंघर्षमिवघनं
संपरिष्वजातेइतितिलतंडुलकं।रागांधावनपेक्षितात्ययौपरस्परमनुविशंताविवोत्संगगतायामभिमुखोपविष्टायांशयनेचेतिक्षीरजलकं।
तदुभयंरागकालइत्युपगूहनयोगाबाभ्रवीयाः।सुवर्णनाभस्यत्वधिकमेकांगोपगूहनचतुष्टयं।तत्रोरुसंदंशेनैकमूरुमूरुद्वयंवास
र्वप्राणंपीडयेदित्यूरूपगूहनं।जघनेनजघनमवपीड्यप्रकीर्यमाणकेशहस्तानखदशनचुंबनप्रयोजनायतदुपरिलंघयेत्तज्जघ
नोपगूहनं।स्तनाभ्यामुरःप्रविश्यतत्रैवभारमारोपयेदितिस्तनालिंगनं।मुखेमुखमासज्याक्षिणीअक्ष्णोर्ललाटेनललाटमाहन्

ललाटिकेति। संवाहनमप्युपगूहनप्रकारमित्येके मन्यन्ते। सोस्य इति। पृथक्कालत्वाद्भिन्नप्रयोजनत्वादसाधारणत्वाच्चेति वात्स्या
नः। पृच्छतां शृण्वतां वापि तथा कथयतामपि। उपगूहविधिं कृत्स्नं रिरंसा जायते नृणां। येपि ह्यशास्त्रिताः केचित्संयोगा रागवर्द्धनाः। आ
दरेणैव तेप्यत्र प्रयोज्याः सांप्रयोगिकाः। शास्त्राणां विषयस्तावद्यावन्मंदरसा नराः। रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः॥ ॥इति सां
प्रयोगिके द्वितीयेधिकरणे द्वितीयोध्यायः॥ ॥आलिंगनविचारा आदितः सप्तमः॥ ॥चुंबननखदशनच्छेद्यानां न पौर्वापर्यमस्ति
६ रागयोगात्। प्राक्संयोगादेषां प्राधान्येन प्रयोगः। प्रहणनसीत्कृतयोश्च संप्रयोगे। सर्वं सर्वत्र रागस्यापेक्षितत्वादिति वात्स्यायनः॥
तानि प्रथमरतेऽव्यक्तानि विश्वस्तविकल्पेन प्रयुंजीत। तथाभूतत्वाद्रागस्य। ततः परमतित्वरया विशेषवत्समुच्चयेन रागसंधुक्षणार्थं।
ललाटगलकपोलनयनवक्षःस्तनोष्ठांतर्मुखेषु चुंबनं। ऊरुसंधिबाहुनाभिमूलयोरपि लाटानां। रागवशाद्देशप्रवृत्तेश्च संति तानि
तानि स्थानानि न तु सर्वजनप्रयोज्यानीति वात्स्यायनः। तद्यथा। निमितकं स्फुरितकं घट्टितकमिति त्रीणि कन्याचुंबनानि। बलात्कारेण नियुक्ता राम ११
मुखे मुखमाधत्ते न तु विचेष्टत इति निमितकं। वदने प्रवेशितमोष्ठं मनागपत्रपाऽवग्रहीतुमिच्छंती स्पंदयति स्वमोष्ठं नोत्तरमुत्सहत इति स्फु

रितं। ईषत्परिगृह्य विनिमीलितनयना जिह्वाग्रेण घट्टयतीति। समं तिर्यक्कुद्भ्रांतं पीडितं अवपीडितं निर्दशनमवपीडयेदिति स्वल्पापीडि
तकं। एवमनधिकरणेन द्यूतं तत्र प्रवर्त्तयेत्। पूर्वमोष्ठसंपादनेन जितमिति स्यात्। तत्र जिता सा ईर्ष्यादितं करं धुनुयात् प्रणुदेद्दशेत् खिं
प प्रियेद्धठादाहृता विवदेत्। पुनरप्यस्तु पण इति ब्रूयात्। तत्रापि जिता द्विगुणमायस्येत्। विश्रब्धस्य प्रमत्तस्य चाधरमवगृह्य दशनान्त
र्गतमनिर्गमं कृत्वा हसेत्। क्रोशेत् तर्जयेत्। प्रनर्तितभ्रूलता च विचलन्नयनेन मुखेन विहसंती तानि तानि च ब्रूयादिति चुंबनद्यूतकलहः।
एतेन नखदशनच्छेद्यप्रहणनद्यूतकलहा व्याख्याताः। चंडवेगयोरेव तु तेषां प्रयोगस्तत्सात्म्यात्। तस्यां चुंबंत्यामेषोत्तरं गृह्णीयादित्यु
त्तरोष्ठं रागदीपनं। ओष्ठसंदंशेनावगृह्यौष्ठद्वयमपि चुंबेदिति संपुटकं स्त्रियाः पुंसो वा अजातव्यंजनस्य। तस्मिन्नितरोपि जिह्वया स्या
दशनान् घट्टयेत् तालु जिह्वां चेति जिह्वायुद्धं। एतेन बलाद्वदनरदनग्रहणं दानं च व्याख्यातं। समं पीडितमंचितं मृदु शेषांगेषु चुंबनं।
वि स्थानविशेषादिति चुंबनविशेषाः। सुप्तस्य मुखमवलोकयंत्याः स्वाभिप्रायेण चुंबनं रागदीपनं। प्रमत्तस्य विवदमानस्य चान्यतोभिमु
खस्य सुप्ताभिमुखस्य वा निद्राव्याघातार्थं चलितकं। चिरादागतस्य शयने प्रसुप्तायाः स्वाभिप्रायचुंबनं प्रातिबोधिकं। सापि तु भ

जिज्ञासार्थिनीवानायकस्यागमनकालंसंलक्ष्यलनकखुमास्यात्।आदर्शेकुड्येसलिलेवाप्रयोज्यायाश्छायाचुंबनमाकारप्र
र्थमेवकार्यं।बालस्यचित्रकर्मणःप्रतिमायाश्चचुंबनंसंक्रांतकमालिंगनंच।तथानिशिप्रेक्षणकेस्वजनसमाजेवासमीपेगतस्यप्र
योज्यायाहस्तांगुलिचुंबनंसंविष्टस्यवापादांगुलिचुंबनं।संवाहिकायानाय [illegible] कमाकारंसानिद्रावशादकामायाइववदनस्योर्वो
र्विन्यस्यनिधानमूरुचुंबनंपादांगुष्ठचुंबनंचेतिआभियोगिकानि।हृतेप्रतिकृतंकुर्यात्ताडितेप्रतिताडितं।करणेनचतेनैवचुंबितेप्र
तिचुंबितं॥ ॥इतिसांप्रयोगिकेद्वितीयेधिकरणेतृतीयोध्यायः॥ ॥छ॥ ॥रागवृद्धौसंघर्षात्मकंनखविलेखनं।तस्यप्रथमस
प्रवासगमने मागमेप्रवासप्रत्यागमनेवक्रुद्धप्रसन्नायांमत्तायांचप्रयोगोननित्यमचंडवेगयोः।तथादशनच्छेद्यस्यसात्म्यवशाद्वा।आच्छुरित
कंअर्द्धचंद्रोमंडलंरेखाव्याघ्रनखंमयूरपदकंशशप्लुतकमुत्पलपत्रकमितिरूपतोऽष्टविकल्पकं।कक्षौस्तनौगलःपृष्ठंज
घनमूरूचस्थानानि।प्रवृत्तरतिचक्राणांस्थानमस्थानंवाविद्यतइतिसुवर्णनाभः।तत्रसव्यहस्तेप्रत्यग्रशिखराणिद्वित्रिशिखरा राम
णिवाचंडवेगयोर्नखानिस्युः।अनुगतराजिसममुज्वलममलिनमविपाटितंविवर्द्धिष्णुमृदुस्निग्धदर्शनमितिनखगुणाः।दीर्घा १२

णिहस्तशोभीन्यालोकेचयोषितांचित्रग्राहीणिगौडानांनखानिस्युः।ह्रस्वानिकर्मसहिष्णूनिविकल्पयोजनासुचस्वेच्छापा [illegible] तीनि
दाक्षिणात्यानां।मध्यमान्युभयभांजिमहाराष्ट्रकाणामिति।तैःसुनियतैर्हनुदेशेस्तनयोरधरेवालघुकरणमनुद्गतलेखंस्पर्शमा मि
त्रजननाद्रोमांचकरमंतेसन्निपातवर्द्धमानशब्दमाच्छुरितकं।प्रयोज्यायांचतस्यांगसंवाहनेशिरसःकंडूयनेपिटकभेदनेव्याकुली
करणेभीषणेचप्रयोगः।ग्रीवायांस्तनपृष्ठेचवक्रोनखपदनिवेशोर्द्धचंद्रकः।तावेवद्वौपरस्पराभिमुखौमंडलं।नाभिमूलककुंदरवं
क्षणेषुतस्यप्रयोगः।सर्वस्थानेषुनातिदीर्घालेखा।सैववक्राव्याघ्रनखकंआस्तनमुखं।पंचभिरभिमुखैर्लेखाचूचुकाभिमुखी
श्ला मयूरपदकं।तत्संप्रयोग [illegible] घनायश्चूचुकेसन्निकृष्टानिपंचनखपदानिशशप्लुतकं।स्तनपृष्ठेमेखलापथेचोत्पलपत्राकृतीति
उत्पलपत्रकं।ऊर्वोःस्तनपृष्ठेचप्रवासंगच्छतःस्मारणीयकंसंहताश्चतस्रस्तिस्रोवालेखाइतिनखकर्माणि।आकृतिविकारयुक्तानि
चान्यान्यपिकुर्वीत।विकाराणामानंत्यादनंतत्वाच्चकौशलविधेरभ्यासस्यचसर्वगामित्वाद्रागात्मकत्वाच्छेद्यस्यप्रकारान्कोभि
समीक्षितुमर्हति।भवतिहिरागेपिचित्रापेक्षा।वैचित्र्याच्चपरस्परंरागोजनयितव्यः।वैचक्षण्ययुक्ताश्चगणिकास्तत्का

नश्च परस्परं प्रार्थनीयं भवति॥ धनुर्वेदादिष्वपि हि कर्मशास्त्रेषु वैचित्र्यमेवापेक्ष्यते किं पुनरिहेति वात्स्यायनः॥ ननु परपरिग्रही
तास्वेवं कुर्यात्। प्रच्छन्नेषु प्रदेशेषु [illegible] तासामनुस्मरणार्थं रागवर्द्धनार्थं च विशेषान् दर्शयेत्॥ नखक्षतानि पश्यन्त्या गूढस्थानेषु
योषितः॥ चिरोत्सृष्टान्यभिनवा प्रीतिर्भवति पेशला॥ चिरोत्सृष्टेषु रागेषु प्रीतिर्गच्छेत्पराभवं॥ रागायतनसंस्मारि यदि न स्यान्नखक्ष
तं॥ पश्यतो युवतिं दूरान्नखोच्छिष्टपयोधरां॥ बहुमानः परस्यापि रागयोगश्च जायते॥ पुरुषश्च प्रदेशेषु नखचिह्नैर्विचित्रितः॥
चित्तं स्थिरमपि प्रायश्चलयत्येव योषितः॥ नान्यत्पटुतरं किंचिदस्ति रागविवर्द्धनं॥ नखदन्तसमुत्थानां कर्मणां गतयो यथा॥ ॥इति
सांप्रयोगिके द्वितीयेऽधिकरणे चतुर्थोऽध्यायः॥ ॥नखजातयः॥ आदितो नवमः॥ ॥उत्तरौष्ठमन्तर्मुखं नयनमिति मुक्त्वा चुम्बनव
ना द्दशनच्छेद्यस्थानानि॥ समाः स्निग्धच्छाया रागग्राहिणो युक्तप्रमाणा निश्छिद्रास्तीक्ष्णाग्रा इति दशनगुणाः॥ कुंठा राज्युद्गताः परुषा वि
षमाः श्लक्ष्णाः पृथवो विरला इति च दोषाः॥ गूढकमुच्छूनकं बिंदुर्बिंदुमाला प्रवालमणिः मणिमाला खंडाभ्रकं वराहचर्वितकमिति द राम
लो शनच्छेद्यविकल्पाः॥ नाति[illegible]हितेन रागमात्रेण विभावनीयं गूढकं॥ तदेव पीडनादुच्छूनकं॥ तदुभयं बिंदुरधरमध्य इति॥ उच्छूनकं प्रवाल १३
मणिश्च कपोले॥ कर्णपूरश्चुंबनं॥ नखदशनच्छेद्यमिति सव्यकपोलमंडनानि॥ दन्तौष्ठसंयोगाभ्यासनिष्पादनात्प्रवालमणिसिद्धिः॥
सर्वस्येयं मणिमालायाश्च॥ अल्पदेशायाश्च त्वचो दशनद्वयसंदंशजा बिंदुसिद्धिः॥ सर्वैर्बिंदुमाला याश्च॥ तस्मान्मालाद्वयमपि गल
कक्षवंक्षणप्रदेशेषु॥ ललाटे चोर्वोर्बिंदुमाला॥ मंडलमिव विषमकूटयुक्तं खंडाभ्रकं स्तनपृष्ठ एव॥ प्रदीर्घा बह्व्यो दशनपदराजयस्ता
म्रान्तराला वराहचर्वितकं॥ स्तनपृष्ठ एव॥ तदुभयमपि चंडवेगयोरिति दशनच्छेद्यानि॥ विशेषके कर्णपूरे पुष्पापीडे तांबूलपलाशे तमा
लपत्रे चेति प्रयोज्यागामिषु नखदशनपदान्याभियोगिकानि॥ देशसात्म्याच्च योषित उपचरेत॥ मध्यदेश्या आर्यप्रायाः शुच्युपचाराः
श्चुंबननखदन्तपदद्वेषिण्यः॥ बाह्लीकदेश्या आवंतिकाश्च॥ रतेषु त्वासामभिनिवेशाः॥ परिष्वंगचुंबननखदन्तचूषणप्रधानाः क्षतवर्जिताः प्र
हणनसाध्या मालव्य आभीर्यश्च॥ सिंधुषष्ठीनां नदीनामन्तरालीया औपरिष्टकसात्म्याः॥ चंडवेगा मंदसीत्कृता अपरान्तिका लाट्यश्च॥
दृढप्रहणनयोगिन्यः खरवेगा एव अपद्रव्यप्रधानाः स्त्रीराज्ये कोशलायां च॥ प्रकृत्या मृद्व्यो रतिप्रिया अशुचिरुचयो निराचाराश्चां
ध्र्यः॥ सकलचतुःषष्टिप्रयोगरागिण्यो ऽश्लीलपुरुषवाक्यप्रियाः शयने च सरभसोपक्रमाः महाराष्ट्रिकाः॥ तथाविधा एव रहसि प्रका

नागरिकाः। मृद्यमानाश्चाभियोगान्मंदं मंदं प्रसिंचंति द्रविड्यः। मध्यमवेगाः सर्वंसहाः स्वांगप्रच्छादिन्यः परांगहासिन्यः कुत्सिताश्ली-
लपरुषपरिहारिण्यो वानवासिकाः। मृदुभाषिण्योनुरागवत्यो मृद्वंग्यश्च गौड्यः। देशसात्म्यात्प्रकृतिसात्म्यं बलीय इति सुवर्णना-
भः। न तत्र देश्या उपचाराः। कालयोगाद्देशाद्देशांतरमुपचारवेषलीलाश्चानुगच्छंति। तच्च विद्यात्। आलिंगनादिषु च रागवर्द्धनं पू-
र्वं विचित्रमुत्तरमुत्तरं च वार्यमाणश्च पुरुषो यत्कुर्यात्तदनुदुःखितं अभ्यस्यमाणा द्विगुणां तदेव प्रतियोजयेत्। बिंदोः प्रतिक्रिया मालो-
टि मालायाश्चाभ्रखंडकं इति क्रोधादिवाविष्टा कलहान्प्रयोजयेत्। सकचग्रहमुन्नम्य मुखं तस्य ततः पिबेत्। निलीयेद्दशेच्चैव तत्र तत्र
क्ष त्र मदेरिता। उन्नम्य कंठं कांतस्य संश्रिता वक्षसः स्थलीं। मणिमालां प्रयुंजीत यच्चान्यदपि लक्षितं। दिवापि जनसंबाधे नायकेन प्रद-
र्शितं। उद्दिश्य स्वकृतं चिह्नं हसेदन्यैरलक्षिता। विकूणयंतीव मुखं कुत्सयंतीव नायकं। स्वगात्रस्थानि चिह्नानि सासूयेव प्रदर्शयेत्।
परस्परानुकूल्येन तदेवं लज्जमानयोः। संवत्सरशतेनापि प्रीतिर्न परिहीयते॥ ॥इति सांप्रयोगिके द्वितीयेधिकरणे पंचमोध्यायः॥ काम
दशनच्छेद्यविधयो देश्याश्चोपचाराः आदितो दशमः॥ ॥रागकाले विशालयंत्येव जघनं मृगी संवेशादुच्चरते। अवह्रासयंती १४

श्रा वहस्तिनी नीचरते। न्याय्यो यत्र प्रयोगस्तत्र समपृष्ठकाभ्यां वडवायाख्याता। तत्र जघनेन नायकं प्रतिगृह्णीयात्। अपद्रव्याणि च स-
णी. विशेषं नीचरते। उत्फुल्लकं। विजृंभितकं। इंद्राणी चेति त्रितयं मृग्याः प्रायेण। शिरो विनिपात्य ऊर्ध्वं जघनमुत्फुल्लकं। तत्रापसारं दद्यात्।
अनीचे सक्थिनी तिर्यगवसृज्य प्रतीच्छेदिति विजृंभितकं। पार्श्वयोः समसक्थी विन्यस्य पार्श्वयोर्जानुनी निदध्यादिति अभ्यासयोगा-
दिंद्राणी। एतयोश्च नररतस्यापि प्रतिग्रहः। संपुटेन प्रतिगृह्णीयात्तत्रीचरते। एतेन नीचनररतस्यापि। संपुटकं पीडितकं वेष्टितकं वा-
डवकमिति हस्तिन्याः। ऋजुप्रसारितावुभावप्युभयोश्चरणाविति संपुटः। स च द्विविधः। पार्श्वसंपुट उत्तानसंपुटश्चेति तथा कर्मयो-
गात्। पार्श्वेण तु शयानो दक्षिणेन नारीमधिशयीत। सार्वत्रिकमेतत्। संपुटप्रयुक्तयंत्रेणैव दृढमूरू पीडयेदिति पीडितकं। ऊरू
व्यत्यस्येदिति वेष्टितकं। वडवेव निष्ठुरमवगृह्णीयादिति वाडवकमाभ्यासिकं। तदांध्रीषु प्रायेणेति संवेशनप्रकारा बाभ्रवीयाः। सौ-
श्र वर्णनाभास्तु। उभावप्यूरू ऊर्द्धाविति तद्भुग्नकं। चरणावूर्द्ध्वौ नायकोऽस्या धारयेदिति जृंभितकं। कुंचितावुत्पीडितकं। तदेकस्मिन्प्रसारितेऽर्द्धपीडि-
प्रसारितइ तकं। नायकस्यांसे एकः। द्वितीयकः प्रसारित इति। पुनः पुनर्व्यत्यासेन वेणुदारितकं। एकः शिरस उपरि गच्छेद्द्वितीयः प्रसारित इति।

लाचितकमाभ्यासिकं॥ संकुचितौ अवसितेदेशे निदध्यादिति कार्कटिकं॥ ऊर्ध्ववृतव्यत्यस्येदिति पीडितकं॥ जंघाव्यत्यासेन पद्मास
वत्॥ पृष्ठं परिष्वजमानायाः पराङ्मुखेन परावृत्तकमाभ्यासिकं॥ जले च संविष्टोपविष्टस्थितात्मकांश्चित्रान्योगानुपलक्षयेत्॥ तथा
सुकरत्वादिति सुवर्णनाभः॥ वार्त्तं तु तदपस्मृतत्वाच्छिष्टैरिति वात्स्यायनः॥ ॥अथ चित्ररतानि॥ ॥ऊर्ध्वस्थितयोर्यूनोः परस्परापा
शु श्रितयोः कुड्यसंश्रितयोर्वा स्थितरतं॥ कुड्याश्रितस्य कंठावसक्तबाहुपाशायाः तद्भुजपंजरोपविष्टायाः ऊरुपाशेन जघनमभिवे
ष्टयंत्याः कुड्ये चरणपराक्रमेण चलंत्या अवलंबितकं रतं॥ भूमौ वा चतुष्पदवदास्थिताया वृषलीलयावस्कंदनं धेनुकं॥ तत्र पृष्ठमुरःक
र्माणि लभते॥ अनेनैव योगेन शौनं छागलमैणेयं गर्दभाक्रांतं मार्जारललितकं व्याघ्रावस्कंदनं गजोपमर्दितं वराहघृष्टकं तुरगाधिरू
ढं॥ यत्र यत्र विशेषो योगोऽपूर्वस्तमुपलक्षयेत्॥ मिश्रीकृतसद्भावाभ्यां तु सह द्वाभ्यां संघाटकं रतं॥ बह्वीभिश्च सह गोयूथिकं॥ वारिक्रीडितकं छा
गलमैणेयमिति तत्कर्मानुकृतियोगात्॥ ग्रामनारीविषये स्त्रीराज्ये च युवानोऽन्तःपुरसधर्माण इति एकैकस्याः परिग्रहभूतास्तेषामेकैकशो यु राम
घ गपच्च यथासात्म्यं यथायोगं च रंजयेयुः॥ धारयेदेनामन्यो निषेवेत॥ वदनमन्यो जघनमन्यो मध्यमन्य इति वारेण व्यतिकरेण चेष्टेरन् १५

एतया गोष्ठीपरिग्रहा वेश्या राजयोषापरिग्रहा व्याख्याताः॥ अधोरतं पायावपि दाक्षिणात्यानामिति चित्ररतानि॥ पुरुषोप
सृप्तकानि पुरुषायितेन वक्ष्यामः॥ पशूनां मृगजातीनां पतंगानां च विभ्रमैः॥ तैस्तैरुपायैश्चित्तज्ञो रतियोगान्विवर्धयेत्॥ तत्सात्म्याद्देशसा
त्म्याच्च तैस्तैर्भावैः प्रयोजितैः॥ स्त्रीणां स्नेहश्च रागश्च बहुमानश्च जायते॥ ॥इति सांप्रयोगिके द्वितीयेऽधिकरणे षष्ठोऽध्यायः॥ ॥सं
संवेशनप्रकाराश्चित्ररतानि आदितः एकादशः॥ ॥कलहरूपं सुरतमाचक्षते विवादात्मकत्वाद्वामशीलत्वाच्च कामस्य॥ तस्यराग
वशात्प्रहणनमंगं॥ प्रहणनस्थानानि च अंसौ शिरः पृष्ठमुरः स्तनांतरं जघनपार्श्वमिति॥ तच्चतुर्विधं॥ अपहस्तकं॥ प्रसृतं॥ मुष्टिः॥ स
मतलमिति॥ तदुद्भवं हि सीत्कृतं तच्चार्त्तिरूपत्वादनेकविधं॥ विरुतानि चाष्टौ हिंकारः॥ स्तनितं॥ कूजितं॥ रुदितं॥ सूत्कृतं॥ दूत्कृतं॥ फूत्कृ
त्कृतं॥ अंबार्थाः शब्दा वारणार्थाः मोक्षणार्थाः अलमर्थास्ते ते चार्थसंप्रयोगात्॥ पारावतपरभृतहारीतशुकमधुकरहंसकारंड
वदात्यूहचक्रवाकलावककरुतानि च सीत्कृतभूयिष्ठानि विकल्पशः प्रयुंजीत॥ उत्संगमुपविष्टायाः पृष्ठे मुष्टिनाभिघातः॥ तत्र सा
सूयेव स्तनितरुदितकूजितानि प्रतिघातांश्च प्रयोजयेत्॥ युक्तयंत्रायाः स्तनांतरेऽपहस्तेन प्रहरेत्॥ मंदोपक्रमं वर्द्धमानरागमापरि

समासेः। तत्र हिंकारादीनाम नियमेनाभ्यासेन तत्कालमेव प्रयोगः। शिरसि कुंचितांगुलिना करेण विवदत्याः प्रहणनं तस्य स्त
ननकं। तत्रान्तर्मुखेन कूजितं हुंकृतं। स्तनितं च श्वसितं रुदितं। वेणोः स्फुटतः शब्दानुकरणं हूत्कृतं। बदरस्येवाप्सु निपततः फूत्कृतं। सर्व
नानाम त्रतुंबनादिषूपक्रान्तायाः ससीत्कृतं मनेनैव प्रत्युत्तरं। रागवशात्प्रहणनाभ्यासे वारणमोक्षणालमर्थानां शब्दा[illegible]मेवार्थिनां चर
तां श्वसितरुदितस्तनितमिश्रितं प्रयोगो विरुतानां च। रागावसानकाले जघनपार्श्वयोस्ताडनमतित्वरया चोपरिसमासेः समनल
कं। तत्र लावककपरभृतहंसविकूजितं त्वरयैव निस्तननं प्रहणनयोगाः। पारुष्यं रभसत्वं च पौरुषं तेजः उच्यते। अशक्तिरार्तिर्व्यावृत्तिरब
लत्वं च योषितः। रागात्प्रयोगसात्म्याच्च व्यत्ययोऽपि कचित्। न चिरं तस्य चैवान्ते प्रकृतेरेव योजनं। कीलामुरसि कर्तरीं शिरसि विद्धां
स्थान कपोलयोः संदंशिकां स्तनयोः पार्श्वयोश्चेति पूर्वैः सह प्रहणनमष्टविधमिति दाक्षिणात्यानां कीलानि वक्षसि युवतीनामुरसि दृश्यन्ते देश
न्य सात्म्यं नदिति कष्टमनार्यमनादृतमिति वात्स्यायनः। तथाचार दपि देशसात्म्यप्रयुक्तमन्यत्र न प्रयुंजीत। आत्ययिकं तु तत्रापि परिह राम
रेत्। रतियोगे हि कीलया गणिकां चित्रसेनां पांचालराजो जघान। कर्तर्या कुंतलः शातकर्णिः शातवाहनो महादेवीं। नरदेवः कपाणि १६

र्विद्धया दुःप्रयुक्तया नटीं काणां चकारेति। आस्यत्र गणिकाकाचित्रचशात्त्रपरिग्रहः। प्रवृत्ते रतिसंयोगे राग एवात्र कारणं। स्वप्नेष्व
पि न दृश्यन्ते ते भावास्ते च विभ्रमाः। सुरतव्यवहारेषु ये स्युस्तत्क्षणकल्पिताः। यथा हि पंचमीं धारां समास्थाय तुरंगमः पथि। स्थाणुं श्वभ्रं दरीं वापि
वेगान्धो न समीक्षते। एवं सुरतसंमर्दे रागान्धौ कामिनावपि। चंडवेगौ प्रवर्तेते समीक्षेते न चात्ययं। तस्मान्मृदुत्वं चंडत्वं युवत्या बलमे
व चात्मनश्च बलं ज्ञात्वा तथा योगान्प्रयुंजीत शास्त्रवित्। न सर्वदा न सर्वासु प्रयोगाः सांप्रयोगिकाः। स्थाने देशे च काले च योग एषां विधीय
ते॥ ॥इति सांप्रयोगिके द्वितीयेऽधिकरणे सप्तमोऽध्यायः॥ ॥प्रहणनयोगास्तद्युक्ताश्च सीत्कृतोपक्रमाः॥ ॥आदितो द्वादशः॥ ॥नाय
कस्य रताभ्यासात्परिश्रममुपलभ्य रागस्य चानुपशममनुमतानेन तमवपात्य पुरुषायितेन साहाय्यं दद्यात्। स्वाभिप्रायाद्वा विक
ल्पप्रयोजनार्थिनी नायककुतूहलाद्वा। तत्र युक्तयंत्रे तेनैवोत्थाप्यमानान् मवपातयेत्। एवं रतमविच्छिन्नरसं तथाप्रवृत्तमेव स्या
दिति एको मार्गः। पुनरारंभेणादित एवोपक्रमेदिति द्वितीयः। सा प्रकीर्यमाणकेशकुसुमा श्वासविच्छिन्नहासिनी वक्त्रसंसर्गार्थं स्त ३
रे नाभ्यामुरः प्रपीडयंती। पुनः पुनर्नमयंती शिरो याश्चेष्टाः पूर्वमस्मै प्रदर्शितवांस्ता एव प्रतिकुर्वीत। पतिता प्रतिपातयामीति

संगी। ष्मितं तर्जयेत्। न च ब्रूयात् पुनः। पुनश्च व्रीडां प्रदर्शयेत्। श्रमे विरामाभीप्सां च पुरुषोपसृप्तैरेवोपसर्पेत्। तानि च वक्ष्यामः। पुरुषः शयि
तं गतायां योषितं तस्या हृद्वनात् क्षिप्तचित्ताया इव नीवीं विश्लेषयेत्। तत्र विवदमानां कपोलचुंबनेन पर्याकुलयेत्। स्थिरलिंगश्च तत्र तत्रै
नां परिस्पृशेत्। प्रथमसंगता चेत् संहतयोरूर्वोरंतरे घट्टनं कन्यायाश्च। तथा स्तनयोर्हस्तकक्षयोः संहतयोरंसयोः ग्रीवायामिति सै
रिणं च यथासात्म्यं यथायोगं च। अलके चुंबनार्थमेनां निर्दयमवलंबेत्। हनुदेशे चांगुलिसंपुटेन। तत्रेतरस्या व्रीडा निमीलनं
च। प्रथमसमागमे कन्यायाश्च रतिसंयोगे वैयाकथमनुरूप्येनेति प्रहस्तोपरीक्षेत। युक्तयंत्रेणोपसृप्यमाणा यतो दृष्टिमावर्तये
त्। तत्रैनां पीडयेदेतद्रहस्यं युवतीनामिति सुवर्णनाभः। गात्राणां स्रस्तता। नेत्रयोर्निमीलनं। व्रीडानाशः। समधिका च रतियोजने
ति स्त्रीणां भावलक्षणं। हस्तौ धुनोति। कंपते। दशति। स्विद्यति। खिद्यते। उत्थातुं न ददाति। पादेन हंति। रतावसाने च पुरुषातिवर्तिनी स्यात् इ
त्यनधिगतभावलक्षणं। तस्याः प्राग्यंत्रयोगात्करेण संबाधं गज इव संक्षोभयेदामृदुभावात्। ततो यंत्रयोजनं। उपसृप्तकं। मंथनं। राम
हुलोवमर्दनं। पीडितकं। निर्घातो वराहघातो वृषाघातः। चटकविलसितं। संपुटइति। पुरुषोपसृप्तानि। न्याय्यमृजुसंमिश्रणमुपसृप्त १७

कं। हस्तेन लिंगं सर्वतो भ्रामयेदिति मंथनं। नीचीकृत्य जघनमुपरिष्टाद्घट्टयेदिति हुलः। तदेव विपरीतं सरभसमवमर्दनं। लिंगेन समा
हत्य पीडयंश्चिरमवतिष्ठेदिति पीडितकं। सुदूरमुत्कृष्य वेगेन स्व जघनमवपीडयेदिति निर्घातः। एकत एव भूयिष्ठमवलिखेदिति व
राहघातः। स एवोभयतः पर्यायेण वृषभघातः। सकृन्मिश्रितमनिःष्क्रमय्य द्विस्त्रिश्चतुरिति घट्टयेदिति चटकविलसितं। राग
वसानिकं व्याख्यातं करणं संपुटइति। तेषां स्त्रीसात्म्याद्विकल्पेन प्रयोगः। पुरुषायितेन तु संदंशो भ्रमरकः प्रेंखोलितकमित्यधिकानि। वाड
वकेन लिंगमवगृह्य निःकर्षयंत्याः पीडयंत्या वा चिरमवसानं संदंशः। युक्तयंत्रा चक्रवद्भ्रमेदिति भ्रमरकः आभ्यासिकः। तत्रेतरः स्वं जघन
मुत्क्षिपेत्। जघनमेव च दोलायमानं सर्वत्र भ्रामयेदिति प्रेंखोलितमिति। युक्तयंत्रैव ललाटे ललाटं निधाय विश्राम्येत। विश्रांतायाश्च पु
रुषस्य पुनरावर्तनमिति पुरुषायितानि। प्रच्छादितस्वभावापि गूढरागाधिकामिनी। विवृणोत्येव भावं स्वं रागादुपरिवर्तिनी। यथाशील
भवेन्नारी यथा च रतिलालसा। तस्या एव विचेष्टाभिस्तत्सर्वमुपलक्षयेत्। न त्वेवर्तौ न प्रजातां न मृगीं न च गर्भिणीं। न चातिव्यायतां ना
रीं योजयेत्पुरुषायिते॥ इति श्री सांप्रयोगिके द्वितीयेधिकरणे ऽष्टमोध्यायः॥ ।पुरुषोपसृप्तानि। पुरुषायितं॥ आदितस्त्रयोद

द्विधा तु तत्र या प्रकृतिः स्त्रीरूपिणी पुरुषरूपिणी च । तत्र स्त्रीरूपिणी स्त्रियाः वेष मालापं लीलां मृदुत्वं भीरुत्वं मुग्धता मसहिष्णु
तां व्रीडां चानुकुर्वीत । जस्यावदने जघनकर्मणि दोषपरिहारक्रमा वक्ष्यते । सा नतोरस्मिताभिमानिकी हसितं लिप्सेत । वेश्यावच्च रितं प्रकाश
येदिति स्त्रीरूपिणी । पुरुषरूपिणी प्रच्छन्नकामा पुरुषं लिप्समाना संवाहकभावमुपचरेत् । संवाहनेन च परिष्वजेत गात्रे रूरूनाय
रूस्यमृह्णीयात् । प्रस्तनपरिचयोरूमूलं संस्पृशन्ती स्थिरलिंगतामस्योपलभ्य पाणिमन्थनेन परिघट्टयेत् । चापलमस्य कुत्सयन्ती
हसेत् । कृतलक्षणेनास्तु पलब्धवैकृतेनेन चोद्यते चेत् स्वयमुपक्रमेत् । पुरुषेणानुचोद्यमाना विवदेत् । कृच्छ्रेण चाभ्युपगच्छेत् । नन्
कर्मादिविधं समुच्चयप्रयोज्यं । निमितं । पार्श्वतोदष्टं । बहिःसंदंशः । अन्तःसंदंशः । चुम्बितकं । परिमृष्टकं । आम्रचूषितं । संगर इति । नेषा
केकमभ्युपगम्य विरामाभीप्सां दर्शयेदिति रथ्य पूर्वस्मिन्नभ्युपगते तदनेन रमेत् वा परं निर्दिशेत् । तस्मिन्नपि मिते तदुत्तरमिति । करा
लं विनमोष्ठे परिविन्यस्तमपविद्धमुखं विधुनुयात् । निमितं । हस्तेनाग्रमवच्छाद्य पार्श्वतो निर्दशनमोष्ठाभ्यामवपीड्य भवतैताव राम
दितिसान्त्वयेत् पार्श्वतोदष्टं । भूयश्चोदिता सा मीलितौष्ठी तस्याग्रं निःपीड्य कर्षयन्ती विधुनुयादिति बहिःसंदंशः । तस्मिन्नेवाभ्यर्थनया १८

किंचिदधिकं प्रवेशयेत् । सापि साग्रमोष्ठाभ्यां निःपीड्य निःष्ठीवेदित्यन्तःसंदंशः । करावलंबितस्यौष्ठवद्ग्रहणं चुम्बितकं । तत्कृता जिह्वाये
ण सर्वतो घट्टनं अग्रेण तद्व्यधनमिति परिमृष्टकं । तथाभूतवदेव रागवशाद् अर्धप्रविष्टं निर्दयमवपीड्यावपीड्य मुंचेदित्याम्रचू षितकं
पुरुषाभिप्रायादवगिरेत् पीडयेच्चा रागसमाप्तेरिति संगरः । यथार्थं चात्र स्तनप्रहणनयोगाद् इत्यौपरिष्टकं । मूकुन्दाः स्वैरिण्यः परिचारि
काः संवाहिकाश्चैतत् प्रयोजयन्तीति देशचर्याः । समयविरोधादसभ्यत्वाच्च । पुनरपि द्विधा सा वदनसंसर्गे स्वयमेवार्त्तिं प्रतिषेधेनेत्याचा
र्याः । वेश्याकामिनो यमदोषोऽन्यतोऽपि परिहार्य इति वात्स्यायनः । तस्मादाभ्यो पौपरिष्टकमाचरन्ति नागरकाभिः सह संप्रयुञ्जते मान्याः । वेश्या
भिरेव न संसृज्यन्ते ह्यपि छन्नकाः । संसृष्टा अपि मुखकर्मणा सोपरिहारं निरपेक्षाः साकेतकाः संप्रयुञ्जते । न तु स्वयमौपरिष्टमाच
रन्तीति नागरिकाः । सर्वमविशंकया प्रयोजयन्तीति सौरसेनाः । एवं ह्याहुः । को हि योषितां शीलं शौचमाचारं चरित्रं प्रत्ययं वचनं वा श्रद्धातु
मर्हति । निसर्गादेव हि मलिनदृष्टय एता न परित्याज्याः । तस्मादासां स्मृतिन एव शौचमन्वेष्टव्यम् । एवं ह्याहुः । वत्सः प्रस्रवणे मेध्यः । श्वा
मृगग्रहणे शुचिः । शकुनिः फलपाते स्त्रीमुखं रतिसंगमे इति । शिष्टविप्रतिपत्तेः स्मृतिवाक्यस्य च सावकाशत्वाद् देशस्थितेरात्मन

स्वप्रकृतिप्रसत्य यानुरूपं प्रवर्तयेदिति वात्स्यायनः। सुमृष्टकुंडलाश्चापि युवानः परिचारिकाः। केषांचिदपकुर्वंति नरालामोप रिष्टकं। तथा
नागरकाः केचिदन्योन्यस्य हितैषिणः। कुर्वंति रूढविश्वासाः प्रायः परपरिग्रहं। पुरुषाश्च तथा स्त्रीषु कर्मैतत्किल कुर्वते। व्यासस्तस्य तु
विज्ञेयो मुखचुंबनवद्विधिः। परिवर्तितदेहौ तु स्त्रीपुंसौ यत्परस्परं। युगपत्संप्रयुज्येते कोकिलः स किलोच्यते। तस्माद्गुणवतस्त्यक्त्वा चतु
रांस्त्यागिनो जनान्। वेश्याः खलेषु रज्यंते दासहस्तिपकेषु च। न त्वेवं ब्राह्मणो विद्वान्मंत्री वाक्यविशारदः। गृहीतप्रत्ययो वापि कारये था:-या
दौपरिष्टकं। न शास्त्रमस्तीत्येतावत्प्रयोगे कारणं भवेत्। शास्त्रार्थान्व्यापिनो वि त्प्रयोगांस्त्वैकदेशिकान्। रसवीर्यविपाका हि श्व
गुणः मांसस्यापि वैद्यके। कीर्तिता इति किं तत्स्याद्भक्षणीयं विचक्षणैः। संत्येव पुरुषाः केचित्संति देशास्तथाविधाः। संति कालाश्च येष्वेते योगा न
स्युर्निरर्थकाः। तस्माद्देशं च कालं च प्रयोगं शास्त्रमेव च। आत्मानं चापि संप्रेक्ष्य योगान्युंजीत वा न वा। अर्थस्यास्य रहस्यत्वाच्चलत्वान्मन
सस्तथा। कः कदा किं कुतः कुर्यादिति को ज्ञातुमर्हति॥ ॥इति सांप्रयोगिके द्वितीयेधिकरणे नवमोध्यायः॥ ॥औपरिष्टकं आदितश्चतुर्द राम
शः॥ ॥नागरकः सह मित्रजनेन परिचारकैश्च कृतपुष्पोपहारे संचारितसुरभिधूपे रत्याधाने प्रसाधिते वासगृहे कृतस्नानप्रसाधनो १९

युक्त्या पीतां स्त्रियं सांत्वनैः पुनः पानेन चोपक्रमेत्। दक्षिणतोस्या उपवेशनं। केशहस्ते वस्त्रांते नीव्यां चाव लंबनं रत्यर्थं सव्येन बाहु
नानुद्धतः परिष्वंगः। पूर्वप्रकरणसंबद्धैः सपरिहासानुरागैर्वचोभिरनुवृत्तिः। गूढाश्लीलानां च वस्तूनां समस्यया परिभाषणं। स
नृत्तमनृत्तं वा गीतं वादित्रं च। कलासु संकथा। पुनः पानेन चोपच्छंदनं। जातानुरागायां च कुसुमानुलेपनतांबूलदानेन शेष
जनविसृष्टिः। विजने च यथोक्तैरालिंगनादिभिरेनामुद्धर्षयेत्। ततो नीवीविश्लेषणादि यथोक्तमुपक्रमेत्। इत्ययं रतारंभः। आवसा
निकं रागमभिवाह्यासंस्कृतयोरिव सव्रीडयोः परस्परमपश्यतोः पृथक्पृथक् बहिर्भूमिगमनं प्रतिनिवृत्य चाव्रीडायमानयोरुचि
तदेशोपविष्टयोस्तांबूलग्रहणमच्छीकृतं चंदनमन्यद्वानुलेपनं तस्या गात्रेषु स्वयमेव निवेशयेत्। सव्येन बाहुना परिष्वज्य च
चषकहस्तः सांत्वयन्पाययेत्। जलानुपानं च खंडखाद्यकमन्यद्वा सात्म्ययुक्तमुभावप्युपयुंजीयातां। अच्छरसकं यूषमम्लाय
वागूं भृष्टमांसोपदंशानि पानकानि चूतफलानि मातुलुंगचुक्रकाणि सशर्कराणि। यथादेशसात्म्यं तत्र मधुरमिदं मृदु विशदमि
ति च विदश्य तत्तदुपाहरेत्। हर्म्यतलस्थयोरूर्ध्वस्थितयोर्वा चंद्रिकासेवनार्थमासनं। तत्रानुकूलाभिः कथाभिरनुवर्तनं। तदंकली

म नायाश्चंद्रमसं पश्यंत्या नक्षत्रपंक्तिव्यक्तीकरणं। अरुंधतीध्रुवसौधिमालादर्शनं चेति रत्नावसानिकं।। तैचैतद्द्वयं। अवसानेपि च
प्रीतिरुपचारे रूपसक्ता। स विश्रंभकथायोगे रतिजनयनेत्वरां परस्परप्रीतिकरै रागभावानुवर्तनैः। क्षणं क्रोधपराङ्मुखत्वैः स्व
रुणाभानिविलोकितैः। हल्लीसकक्रीडनकैर्गायनैर्लाटरासकैः। रागलोलार्द्रनयनैश्चंद्रमंडलवीक्षितैः। आद्ये संदर्शने जाते पूर्वं ये स्यु
र्मनोरथाः। पुनर्वियोगे दुःखं च तस्य च प्रतिकीर्तनैः। कीर्तनांते च रागेण परिष्वंगैः सचुंबनैः। तैस्तैः स्वभावैः संसक्तैः यूनोः स्नेहो विवृ
द्धितो। रागवत्। आहार्यरागं। कृत्रिमरागं। व्यवहितरागं। पोटारतं। खलरतं अयंत्रितरतमिति रतविशेषाः। संदर्शनात्प्रभृत्युभयो
रपि प्रयत्नकृते समागमे। प्रवासप्रत्यागमने कुपितप्रसन्नायां च रागवत्। तत्राभिप्रायायावदर्थं च प्रवृत्तिः। मध्यस्थरागयो मा
रा रारब्धं यदनुरज्यते तदाहार्यरागम्। तत्र चातुःषष्टिकैर्योगैः सात्म्यानुविद्धैः संधुक्ष्य संधुक्ष्य रागं प्रवर्तयेत्। कार्यहेतोरन्यत्र सक्तयो
र्वा तत्कृत्रिमरागं। तत्र समुच्चयेन योगान् शास्त्रतः पश्येत्। पुरुषस्तु हृदयप्रियामन्यां मनसि निधाय व्यवहरेत्। संप्रयोगा राम
त्प्रभृति रतिं यावत् यत्र तद्व्यवहितरागं। न्यूनायां पतिकारिकायां वा यावदर्थं प्रयोगस्तत्पोटारतं। तत्रोपचारान्नाद्रियेत। तथा वेश्या २०

ग्रामीणेन सह यावदर्थं खलरतं। ग्रामव्रजप्रत्यंतयोषिद्भिश्च नागरिकस्य। उत्पन्नविश्रंभयोश्च परस्परसात्म्यानुकूल्यादयंत्रित
रतमिति रतानि। वर्धमानप्रणया तु नायिका सपत्नीनामग्रहणं तदाश्रयमालापं गोत्रस्खलितं वा न मर्षयेत्। नायकव्यलीकं च।
तत्र सुभृशः कलहः। रुदितमायासः। शिरोरुहाणामवक्षोटनं प्रहरणं आसनाच्छयनाद्वा महीपतनं माल्यभूषणावमोक्षो भू
शय्या चान्यत्र। तत्र युक्तरूपेण साम्ना पादपतनेन वा प्रसन्नचित्तां तामनुनयन्नुपक्रम्य शयनमारोहयेत्। तस्य च वचनमुत्तरीयेण योजय
न्ती विवृद्धक्रोधा सकचग्रहणमस्यास्य समुन्नमय्य पादेन बाहौ शिरसि वक्षसि पृष्ठे वा सकृद्द्विस्त्रिरवहन्यात्। द्वारदेशं गच्छेत्।
तत्रोपविश्याश्रुकरणं। अतिक्रुद्धापि तु न द्वारदेशाद्भूयो गच्छेत्। दोषवत्त्वादिति दत्तकः। तत्र युक्तितोऽनुनीयमाना प्रसादमाकां
क्षेत्। प्रसन्नापि तु सकषायैरेव वाक्यैस्तुदन्तीव प्रसन्नचारनिकांक्षिणी परिरभ्येत। स्वभवनस्था तु निमित्तात्कलहिता तथाविधचे
ष्टैव नायकमभिगच्छेत्। तत्र पीठमर्दविटविदूषकैर्नायकप्रयुक्तैरुपशमितरोषा तैरेवानुनीता तैः सहैव तद्भवनमधिगच्छेत्। तत्रैव
चावसेत्। इति प्रणयकलहः। एवमेतां चतुःषष्ट्या बाभ्रव्येण प्रकीर्तितां। प्रयुंजानो वरस्त्रीषु सिद्धिं गच्छति नायकः। ब्रुवन्नप्यन्यशास्त्र

ति चतुःषष्टिविवर्जितः। विदग्धसंसदि नाप्यर्थं कथासु परिभुज्यते। वर्जितोप्यन्यविज्ञानैरनयायस्त्वलंकृतः। सगोष्ठ्यां नरनारीणां क
थास्वग्रं विगाहते। विद्वद्भिः पूजितामेनां खलैरपि सुपूजितां। पूजितां गणिकासंघैर्नंदिनीं को न पूजयेत्। नंदिनी सुभगा सिद्धा सुभगं गं २
करणीति च। नारीप्रियेति चाचार्यैः शास्त्रेष्वेषा निरुच्यते। कन्याभिः परयोषिद्भिर्गणिकाभिश्च भावतः। वीक्ष्यते बहुमानेन चतुःषष्टिविच
क्षणः॥ ॥इति सांप्रयोगिके द्वितीयेऽधिकरणे दशमोध्यायः॥ ॥रतविशेषाः प्रणयकलहः॥ ॥इत्यादितः पंचदशः॥ ॥समाप्तं ल
चेदं सांप्रयोगिकं द्वितीयमधिकरणं॥ ॥सवर्णायामनन्यपूर्वायां शास्त्रतोधिगतायां धर्मोर्थः पुत्राः संबंधः पक्षवृद्धिरनुपस्कृता
रतिश्च। तस्मात्कन्यामभिजनोपेतां मातापितृमतीं त्रिवर्षात्प्रभृतिन्यूनवयसं श्लाघ्याचारे धनवति पक्षवति संबंधिप्रिये संबंधिभि
श्चाकुले कुले प्रसूतां प्रभूतपितृपक्षां रूपशीललक्षणसंपन्नां अन्यूनाधिकाविनष्टकेशनखकर्णाक्षिस्तनीमरोगप्रकृतिश दंत
रीरां तथाविध एव श्रुतवान् शीलयेत्। यां गृहीत्वा कृतिनमात्मानं मन्येत न च समानैर्निंद्येत तस्यां प्रवृत्तिरिति घोटकमुखः। त राम
स्या वरणे मातापितरौ संबंधिनश्च प्रयतेरन्। मित्राणि च गृहीतवाक्यान्युभयसंबंद्धानि। तान्यन्येषां वरयितॄणां दोषान्प्रत्यक्षाना २९

गमिकासुखं श्रावयेयुः। कौलान्पौरुषानभिप्रायसंवर्द्धनानन्यांश्च नायकगुणान्विशेषतश्च कन्यामातुरनुकूलांस्तदात्वायति
युक्तान्दर्शयेयुः। दैवचिंतकरूपश्च शकुननिमित्तग्रहबललग्ननक्षत्रलक्षणदर्शनेन नायकस्य भविष्यन्तमर्थसंयोगं कल्याण
मनुवर्णयेत्। अपरे पुनरस्यान्यतो विशिष्टेन कन्यालाभेन कन्यामातरमुन्माद्येयुः। दैवनिमित्तशकुनोपश्रुतीनामानुलोम्येन क
र न्यां वरयेद्दद्याच्च। न यदृच्छया केवलमात्मात्रेयमेति घोटकमुखः। सुप्तां रुदतीं निःक्रांतां वरणे परिवर्जयेत्। अप्रशस्तनामधेयां चाद
त्तां गुप्तां घोनां पृषतां ऋषभां विनतां विकटां मुंडां शुचिदूषितां स्नावरिकां शाकरिकां राकां फलिनीं पालीमू। गुल्लिनीमू। व्यंगां। मि
त्रां अनुजां वर्षांविवर्जयेत्। नक्षत्राख्यां नदीनाम्नीं वृक्षनाम्नीं च गर्हितां। लकाररेफोपांतां च वर्जयेत्। यस्यां नायकस्य मनश्चक्षुषोर्निब बरणे
ते धः तस्यामृद्धिर्नेतरामाद्रियेतेत्येके। तस्मात्प्रदानकाले कन्यामुदारवेषां दर्शनविषये स्थापयेयुः। आपराह्णिकं चानित्यं प्रसाधितायाः स
खीभिः सह क्रीडा यज्ञविवाहादिषु जनसमवायेषु प्रायत्निकं दर्शनं। तथोत्सवेषु च। पण्यसधर्मत्वात्कन्यानां। वरणार्थमुपागतं
श्च भद्रदर्शनान्प्रदक्षिणवाचश्च सुहृत्संबंधिसंगतानुकूलपुरुषान्मंगलैः प्रतिगृह्णीयुः। कन्यां चैषामलंकृतामन्यापदेशेन द

र्पयेयुः दैवं परीक्षणं चावधिं स्थापयेयुः। आप्रदाननिश्चयात्। स्नानादिषु च नियुज्यमाना वरयितारः सर्वं भविष्यतीत्युक्त्वा न तद
रेवाभ्युपगच्छेयुः। देशप्रवृत्तिसात्म्याद्वा ब्राह्मप्राजापत्यार्षदैवानामन्यतमेन विवाहेन शास्त्रतः परिणयेदिति वरणविधानं॥ स
मस्या याः सहक्रीडा विवाहा मंगलानि च। समानैरेव कार्याणि नोत्तमैर्नापि वाधमैः॥ कन्यां गृहीत्वा वर्तेत प्रेष्यवद्यत्र नायकः। त
द्विद्यादुच्चसंबंधं परित्यक्तं मनस्विभिः॥ स्वामिवद्विचरेद्यत्र बांधवैः स्वैः पुरस्कृतः। अश्लाघ्यो हीनसंबंधः सोऽपि सद्भिर्निगद्यते॥ पर
स्परसुखास्वादा क्रीडा यत्र प्रयुज्यते। विशेषयंती चान्योन्यं संबंधः स विधीयते॥ कृत्वापि चोच्चसंबंधं पश्चाद्ज्ञातिषु संनमेत्॥ न त्वेव
हीनसंबंधं कुर्यात्सद्भिर्विनिंदितं॥ ॥इति कन्यासंप्रयुक्तके तृतीयेऽधिकरणे प्रथमोऽध्यायः॥ ॥वरणविधानं संबंधनिश्चयः॥ ॥
ऽऽदितः षोडशः॥ ॥संगतयोस्त्रिरात्रमधःशय्या ब्रह्मचर्यम [illegible] क्षारलवणमाहारस्तथा सप्ताहं सतूर्यमंगलस्नानं प्र
साधनं सहभोजनं प्रेक्षा संबंधिनां च पूजनं॥ ॥इति सार्ववर्णिकम्॥ ॥तस्मिन्नेतां निशि विजने मृदुभिरुपायैरुपक्रमेत॥ त्रिरा राम
त्रमवचनमिति बाभ्रवीयाः। त्रिरात्रमवचनं हि स्तंभमिव निर्विण्णा नायकं पश्येत्कन्या निर्विष्टो हेनापरिभवेच्च तृतीयामिव प्रकृतिमिति २२

बाभ्रवीयाः उपक्रमेत विश्रंभयेच्च न तु ब्रह्मचर्यमतिवर्तेतेति वात्स्यायनः। उपक्रममाणश्च न प्रसह्य किंचिदाचरेत्। कुसुमधर्माणो हि योषितः सरी
कुसुमारोपक्रमास्तास्त्वनधिगतविश्वासैः प्रसभमुपक्रम्यमाणाः संप्रयोगद्वेषिण्यो भवंति पुरुषद्वेषिण्यो वा। तस्मात्साम्नैवोप
क्रमेत्। युक्त्यापि तु यतः प्रसरमुपलभेत तेनैवानुप्रविशेत्। तत्प्रियेणालिंगनेनाचरितेनानतिकालत्वात्। पूर्वकायेन चोपक्रमे
ला त विषह्यत्वात्। दीपालोके विगाढयौवनायाः पूर्वसंस्तुतायाः। बालाया अपूर्वायाश्चांधकारे। अंगीकृतपरिष्वंगायाश्च वदनेन तांबूलदानं तदप्रतिपद्यमानां सांत्वनवा
क्यैः शपथैः प्रतियाचितैः पादपतनैश्च ग्राहयेत्। व्रीडायुक्तापि योषित्संततं क्रुद्धापि न पादपतनमतिवर्तत इति सार्वत्रिकं॥ तांबूलदान
प्रसंगेन च मृदु विशदमकाहलमस्याश्चुंबनं। तत्र सिद्धामालापयेत्। तदालापश्रवणार्थं यत्किंचिदल्पाक्षराभिधेयमजानन्निव पृच्छे
त्। तत्र निःप्रतिपत्तिमनुद्वेजयन्सांत्वनायुक्तं बहुश एव पृच्छेत्। तत्राप्यवदंतीं निर्बध्नी [illegible] यात्। सर्वा अपि हि कन्याः पुरुषेण प्रयुज्यमानं नि
वचनं विषहंते न तु लघुमिश्रामपि वाचं वदंतीति घोटकमुखः। निर्बध्यमाना तु शिरःकंपेन प्रतिवचनानि योजयेत्। न शिरः कंपयेत्। इच्छ
सि मां नेच्छसि किं तेऽहं रुचितो अरुचितो वेति पृष्टा चिरं स्थित्वा निर्बध्यमाना तदनुकंपेन शिरः कंपयेत्। प्रपंच्यमाना तु विवदेत्। संस्कृता चेन्

सखींवानुकूलामुभयतोविश्रब्धामंतराकृत्वाकथायोजनं।तस्मिन्नधोमुखीविहसेत्।तांचातिवादिनीमधिक्षिपेत्विवदेच्च।सा
तुपरिहासार्थमिदमनयोक्तमित्यनुक्तमपिब्रूयात्।तत्रतामपनुद्यमानातूष्णीमासीत।निर्बध्यमानातुनाहमेवंब्रवीमीति अ
व्यक्ताक्षरमनवसितार्थंवचनंब्रूयात्।नायकंचविहसंतीकदाचित्कटाक्षैःप्रेक्षेत।इत्यालापयोजनं।जातपरिचयावानिर्वदंतीत
त्समीपेयाचितंतांबूलंस्रजंविलेपनमितिनिदध्यादुत्तरीयेचास्यबध्नीयात्।तथायुक्तामाच्छुरितकेनस्तनमुकुलयोरुपरिस्पृशेत्।
वार्यमाणश्चत्वमपिमांपरिष्वजस्वततोनैवमाचरिष्यामीतिस्थित्यापरिष्वंजयेत्।परिष्वजमानायाःस्वहस्तमानाभिप्रदेशात्
प्रसार्यनिवर्तयेत्।क्रमेणचैनामुत्संगमारोप्याधिकमधिकमुपक्रमेत।अप्रतिपद्यमानांचभीषयेत्।अहंखलुदंतपदानि
अधरेकरिष्यामिस्तनपृष्ठेचनखपदं।आत्मनश्चस्वयंकृत्वात्वयाकृतमितितेसखीजनस्याग्रेवक्ष्यामि।सात्वंकिमत्रप्रतिपत्स्यस
इतिबालविभीषिकैर्बालप्रत्यायनैश्चशनैःशनैरेनांप्रतारयेत्।द्वितीयस्यांरात्रौतृतीयस्यांचकिंचिदधिकंविस्रंभितांहस्तेनयोजयेत्।सा राम
र्वांगिकंचचुंबनमुपक्रमेत।ऊर्वोश्चोपरिविन्यस्तपाणिःसंवाहनक्रियायांसिद्धायांक्रमेणोरुमूलमपिसंवाहयेत्।निवारितेसंवा २३

हनेकोदोषइत्याकुलयेत्।एनांतच्चस्थिरीकुर्यात्।तत्रसिद्धायांगुह्यदेशाभिमर्शनं।रशनावियोजनं।नीवीविमोचनं।वसन
परिवर्तनं।ऊरुमूलसंवाहनं।एतेचास्यअन्यापदेशाः।तत्कालेयुक्तंयथारंजयेत्।अनुशिष्याच्चआत्मानुरागंदर्शयेत्।मनो
रथांश्चपूर्वकाननुवर्णयेत्।आयत्यांचतदानुकूल्येनप्रवृत्तिंप्रतिजानीयात्।सपत्नीभ्यश्चसाध्वसमव द्यात्।क्रमेणविमुक्तक छिं
न्याभावामनुद्वेजयन्नुपक्रमेत्।इतिकन्याविस्रंभणं।एवंचित्तानुगोबालामुपायेनप्रसाधयेत्।तथास्यसानुरागाचविश्रब्धाचैव
जायते।नात्यंतमानुलोम्येननचातिप्रातिलोम्यतः।सिद्धिंगच्छतिकन्यासुतस्मान्मध्येनसाधयेत्।आत्मनःप्रीतिजननंयोषितांमानवर्ध
नं।कन्याविस्रंभणंवेत्तियःसतासांप्रियोभवेत्।अतिलज्जान्वितेत्येवंयस्तुकन्यामुपेक्षते।सोनभिप्रायवेदीतिपशुवत्परिभूयते।म
हसावाप्युपक्रांता।कन्याचित्तमविंदता।भयंवित्रासमुद्वेगंसद्योद्वेषंचगच्छति।साप्रीतियोगमप्राप्यतेनोद्वेगेनदूषिता।पुरुषद्वेषिणी
वास्याद्विद्विष्टावाततोन्यगा॥ ॥इतिश्रीकन्यासंप्रयुक्तकेतृतीयेधिकरणेद्वितीयोध्यायः॥ ॥कन्याविस्रंभणंनामआदितःसप्त
दशः॥ ॥धनहीनस्तुगुणयुक्तोपिमध्यम[illegible]गुणोहीनापदेशोवासधनोवाप्रातिवेश्यः।मातापितृभ्रातृषुचपरतंत्रोबालवृ

य त्रिकृत्विनप्रवेशो वा। कन्यामलभमानो वरयेत्। बाल्यात्प्रभृतितेनो स्वयमेवानुरंजयेत्। तथायुक्तश्च मातुलानुवर्तिनी दक्षिणापथे बा थ
ल्य एव मातापितृभ्यां वियुक्तः परिभूतकल्पो वाधनो लब्धर्द्धिलभ्यां मातुलदुहितरमन्यस्मै वा पूर्वदत्तां साधयेत्। अन्यामपि बाह्यां स्पृहये
संभक्तिः-२ त्। बालायामेवं सति धर्माधिगमे संवननं श्लाघ्यमिति घोटकमुखः। तया पुष्पावचयं ग्रथनं गृहकं दुहितृकाक्रीडायोजनं भ
क्तपानकरणमिति कुर्वीत परिचयस्य वयसश्चानुरूप्यात्। आकर्षक्रीडा पट्टिकाक्रीडा मुष्टिना। निमध्यमांगुलीग्रहणं। षट्पाषाण
कादीनि देश्यानि च। तत्सात्म्यात्। तदाप्तदासचेटिकाभिस्तया च सहानुक्रीडेत। उदकक्ष्वेडनकानि च सुनिमीलितकं। मानसिकामु
त्लवणवीथिकं अनिलताडितकं अंगुलिताडितकम्। गोधूमपुंजिकाम्। अन्यानि च देश्यानि यां च विश्वास्यां मन्येत तया सह निरंतरां प्री
तिं कुर्यात्। परिचयांश्च बुध्येत। धात्रेयिकां चास्याः प्रियहिताभ्यामधिकमुपगृह्णीयात्। सा हि प्रीयमाणा विदिताकारापि अप्रत्यादिता
उ नी तं तां च योजयितुं शक्नुयात्। अनभिहिता वा प्रत्याचार्यकं नायकस्याविदिताकारापि हि गुणानेवानुरागात्प्रकाशयेत्। यथा प्रयोज्या राम
नुरज्येत। यत्र यत्र वा कौतुकं प्रयोज्यायास्तदनुप्रविश्य साधयेत्। क्रीडनकद्रव्याणि वा पूर्वाणि यान्यन्यासां कचिद्विरलशो विद्युस्ता २४

तान्यस्याः प्रयत्नेन संपादयेत्। कंदुकमनेकभक्तिचित्रमल्पकालांतरितमन्यदन्यच्च संदर्शयेत्। तथा सूत्रदारुगवलगजदंतमयी
दुहितृका मधूच्छिष्टपिष्टमृन्मयीश्च। भक्तपाकार्थमस्या महानसस्य दर्शनं। काष्ठसंप्रयुक्तयोर्मेषयोश्च तथैवाजैडकानां देवकुलगृ
हकानां मृद्विदलकाष्ठविनिर्मितानां शुकपरभृतमदनसारिकालावककुक्कुटतित्तिरिपंजरकाणां विचित्राणां चाकृतियुक्तानां जल
भाजनानां च यंत्रकाणां वीणिकानां पिंडोलिकानां कंडोलिकानां ... पेटलिकानां मलक्तकमनःशिलाहरितालहिंगुलक
श्यामकादीनां चंदनकुंकुमयोः पूगफलानां तांबूलपत्राणामिति कालयुक्तानां शक्तिविषये प्रच्छन्नं दानं प्रकाशद्रव्याणां तु प्रकाशे
यथा च सर्वाभिप्रायसंवर्द्धकमेनं मन्येत। वीक्षणे च प्रच्छन्नमर्थयेत्। तथा कथायोजनं। प्रच्छन्नदानस्य तु कारणमात्मनो गुरुजनाद्
भयं ख्यापयेत्। देयस्य चान्येन स्पृहणीयत्वमिति। वर्द्धमानानुरागं वाख्यानके मनः कुर्वतीमन्वर्थाभिः कथाभिश्चित्तहारिणीभिश्च
रंजयेत्। विस्मयेषु प्रयुक्तमनामैंद्रजालैर्योगैर्विस्मापयेत्। कलासु कौतुकिनीं तत्कौशलेन। गीतप्रियां श्रुतिहरैर्गीतैः। आश्वयुज्या रै
मष्टमीचंद्रके कौमुद्यामुत्सवेषु यात्रायां ग्रहणे गृहाचारे वा विचित्रैरापीडैः कर्णपत्रभंगैः सिक्थकप्रधानैरंगुलीयकभूषणदानैश्च

नचेद्दोषकराणि मन्येत। अन्यपुरुषविशेषाभिज्ञां धात्रेयिकां वास्याः पुरुषप्रवृत्तां चातुःषष्टिकान्योगान्ग्राहयेत्। नद्रूहण
पदेशेन च प्रयोज्यायां रतिकौशलमात्मनः प्रकाशयेत्। उदारवेषश्च स्वयमनुपहतदर्शनश्च स्यात्। भावं च कुर्वतीमिंगिताकारैः
सूचयेत्। युवतयो हि संसृष्टमभीक्ष्णदर्शनं च पुरुषं कामयंते। कामयमाना अपि तु नाभियुंजत इति प्रायोवादः। इतींगिता
कारान्वक्ष्यामः। संमुखं तं न वीक्षते। वीक्षिता व्रीडां दर्शयति। नत्वरालेनांगमन्यापदेशेन प्रकाशयति। प्रयांतं प्रच्छन्नं वा नायकम
तिक्रांतमपीक्षते। पृष्टापि किंचित्सस्मितमव्यक्ताक्षरमनवसितार्थं मंदमंदमन्यनोमुखी कथयति। तत्समीपे च चिरं स्थानमभि
नंदति। दूरे स्थिता पश्यतु मामिति मन्यमाना परिजनं सवचनविकारमाभाषते। तं च देशं न मुंचति। यत्किंचिद्दृष्ट्वा विहसितं करो
ति। तत्र कथामवस्थानार्थं मंदमनुबध्नाति। बालस्यांकगतस्य चुंबनमालिंगनं च करोति। परिचारिकायास्तिलकं रचयति। प
रिजनेष्वावष्टंभोचनांनां लीलां दर्शयति। तन्मित्रेषु विश्वसिति। वचनं चैषां बहु मन्यते। करोति च। तत्परिचारकैः सह प्रीतिं संकथां राम
द्यूतमिति च करोति। स्वकर्मसु चैनान्प्रभविष्णुरिव नियुंक्ते। तेषु च नायककथामन्यस्य कथयत्सु तत्त्वविहिता शृणोति। धात्रेयिकानो २५

दिना नायकस्योदवसितं प्रविशति। तामंतरा च कृत्वा तेन सह द्यूतं क्रीडामालापं च योजयितुमिच्छति। अनलंकृता दर्शनपथं परिह
रति। कर्णपत्रमंगुलीयकं स्रजं वा तां नायकेन याचिता सधीरमेव गात्रादवमुच्य सख्या हस्ते ददाति। तेन च दत्तं नित्यं धारयति। अन्यवर
संकथासु विषण्णा भवति। तत्पक्षैश्च संसृज्यत इति। दृष्टैनानुभावसंयुक्ता नाकारानिंगितानि च। कन्यायाः संप्रयोगार्थं तांस्तान्योगा
न्विचिंतयेत्। बालक्रीडनकैर्बालां कलाभिर्यौवने स्थितां। वत्सलां चापि गृह्णीयात् विश्वास्यजनसंग्रहात्॥ ॥इति कन्यासंप्रयुक्तके तृ
तीयेधिकरणे तृतीयोऽध्यायः॥ ॥बालोपक्रमं इंगिताकारसूचनं॥ ॥आदितो द्वादशः॥ ॥दर्शितेंगिताकारां कन्यामुपायतोऽभि
युंजीत। द्यूतक्रीडनकेषु च विवदमानः साकारमस्याः पाणिमवलंबयेत्। यथोक्तं स्पृष्टकादिमालिंगनविधिं विदध्यात्। पत्रच्छेद्यक्रिया
यां स्वाभिप्रायसूचनं मिथुनमस्या दर्शयेत्। एवमन्यदन्यद्बहिरल्पशो दर्शयेत्। जलक्रीडायां तद्दूरतोप्सु निमग्नः समीपमस्या गत्वा स्पृ
ष्ट्वैनां तत्रैवोन्मज्जेत्। नवपत्रिकादिषु च सविशेषं भावनिवेदने। आत्मदुःखस्यानिवेदनं स्वप्नस्य च भावयुक्तस्यापदेशेन प्रेक्षणके स्वज कथनं २
नसमवाये वा समीपोपवेशनं। तत्रान्यापदिष्टस्पर्शनं। अपाश्रयणार्थं चरणेन चरणस्य पीडनं। ततः शनकैरेकैकामंगुलिमभिस्

शेत्।नखाग्राणि च घट्टयेत्।तत्र सिद्धायां परां स्पर्शनमभिकांक्षेत्।क्षान्त्यर्थं च न देवाभ्यसेत्।पादश्चैव परांगुलिसंदंशेन नखांगुलिसंपीड
नं।द्रव्यस्य समर्पणे प्रतिग्रहे वा तन्निमित्तो विकारः।आचमनार्थोदकेन निषेकः।विजने तमसि च द्वन्द्वमासीनः क्षांतिं कुर्वीत।समानदेशश
यायां वा तत्र यथार्थमनुद्वेजयता भावनिवेदनं।विविक्ते च किंचिदस्ति कथयितव्यमित्युक्त्वा निर्वचनं।भावेन तत्रोपलक्षयेत्।यथा पा
रदारिके वक्ष्यामः।विदितभावस्तु व्याधिमपदिश्यैनां वार्ताग्रहणार्थं स्वमुदवसितमानाययेत्।आगतायाः स्वशिरःपीडने नियोगः।
पाणिमवलंब्य चास्याः साकारं नयनयोर्ललाटे च निदध्यात्।औषधापदेशार्थं चास्याः स्वकर्म विनिर्दिश्य नात्।इदं त्वया कर्तव्यं न ह्येतदन्ये
वा कन्याऽन्येन कार्यमिति।गच्छन्तीं पुनरागमनानुबंधमेनां विसृजेत्।अस्य च योगस्य त्रिरात्रं त्रिसंध्यं च प्रयुक्तिः।अभीक्ष्णं दर्शना
र्थमागतायाश्च गोष्ठीं वर्द्धयेत्।अन्याभिरपि सह विश्वासनार्थमधिकमधिकं चाभियुंजीत।न तु वाचा निर्वदेत्।दूरगतभावोऽपि कन्या
सु न निर्वदेत् इति घोटकमुखः।यदा तु बहुसिद्धां मन्येत तदैवोपक्रमेत्।प्रदोषे निशि तमसि च योषितो मन्दसाध्वसाः सुरतव्यवसा राम
यिन्यो रागवत्यश्च भवंति न च पुरुषं प्रत्याचक्षते।तस्मात्तत्कालं प्रयोजयितव्या इति प्रायोवादः।एकपुरुषाभियोगानां तु समवेदहीना २८

र्थया धात्रेयिकया सख्या वा तस्या मातृविश्वासितया तमर्थमनिर्वदन्त्या सह एनामंकमारोपयेत्।अथ यथोक्तमभियुंजीत।स्वां वा परिचा
रिकां आदावेवास्याः सखीत्वेन प्रणिदध्यात्।यज्ञे विवाहे यात्रायामुत्सवे व्यसने प्रेक्षाव्यग्रे जने तत्र तत्र दृष्टेंगिताकारां परीक्षितभा
वामेकाकिनीमुपक्रमेत्।न हि दृष्टभावा योषितो देशे काले च प्रयुज्यमाना व्यावर्तन्त इति वात्स्यायनः।एकपुरुषाभियोगाः।मंदापदे
शा गुणवत्यपि कन्या धनहीना कुलीनापि समानैरयाच्यमाना मातापितृवियुक्ता वा ज्ञातिकुलवर्तिनी वा प्राप्तयौवना पाणिग्रह
णं स्वयमभीप्सेत।सा तु गुणवंतं शक्तं सुदर्शनं बालप्रीत्याभियोजयेत्।यं वा मन्येत मातापित्रोरसमीक्षया स्वयमप्ययमिन्द्रियदौ
र्बल्यान्मयि प्रवर्तिष्यत इति प्रियहितोपचारैरभीक्ष्णदर्शनेन च तमावर्जयेत्।माता चैनां सखीभिर्धात्रेयिकाभिश्च सह तदभियु
क्तां कुर्यात्।पुष्पगंधताम्बूलहस्ताया विजने विकाले च तदुपस्थापनं।कलाकौशलप्रकाशने वा संवाह[illegible]ने शिरसः कंडूय[illegible]ने पा
डने चोचितदर्शनं।प्रयोज्यस्य सात्म्ययुक्ताः कथायोगाः।न तु बालायामुपक्रमेषु च यथोक्तमाचरेत्।नेता तु रागादपि पुरुषं स्व
यमभियुंजीत।स्वयमभियोगिनी हि युवतिः सद्यः सौभाग्यं जहातीत्याचार्याः।तत्प्रयुक्तानां त्वभियोगानां प्रातिलोम्येन ग्रहणं परि

घक्राचनविकृतिंभजेत्।श्लक्ष्णमाकारमजानतीवप्रतिगृह्णीयात्।वदनग्रहणेबलात्कारः।रतिभावनामभ्यर्थ्यमानायाःगुह्य
संस्पर्शनामभ्यर्थितापितु नातिविवृतात्मास्वयंस्यादन्यत्रनियतकालात्।यदातुमन्येतानुरक्तोयंनव्यावर्तिष्यतइतितदैवं
नमभियुंजानाबालभावंविमोक्षेत्।विमुक्तकन्याभावाचविश्वास्येषुप्रकाशयेदितिस्त्वोपावर्तनं।।कन्याभियुज्यमानातुयंमन्येता
श्रयंसुखं।अनुकूलंचवश्यंचतस्यकुर्यात्परिग्रहं।अनपेक्ष्यगुणानन्यत्ररूपमौचित्यमेवच।कुर्वीतधनलोभेनपतिं सापत्नके
ष्वपितत्रयुक्तगुणंवश्यंशक्तंबलवदर्थिनं।।उपायैरुपयुंजीतकन्यानभिलोमयेत्।वरंवश्योदरिद्रोपिनिर्गुणोप्यात्मधारणः।गु
णैर्युक्तोपिवानैवबहुसाधारणःपतिः।प्रायेणधनिनांदाराःबहवोनिरवग्रहाः।बाह्येसत्युपभोगेपिनिर्विश्रंभाबहिःसुखाः।नीचोयस्त्व
भियुंजीतपुरुषःपलितोपिवा।विदेशगतिशीलश्चनससंयोगमर्हति।यदृच्छयाभियुंक्तेयोदंभद्यूताधिकोपिवा।सपत्नीकश्चसापत्योन
ससंयोगमर्हति।गुणसाम्येभियोक्तॄणामेकोवरयितावरः।तत्राभियोक्तरिश्रैष्ठ्यमनुरागात्मकोहिसः।। ।।इतिकन्यासंप्रयुक्तकेतृ
तीयेधिकरणेचतुर्थोध्यायः।। ।।एकपुरुषाभियोगाः।। ।।अभियोगतश्चकन्यायाःप्रतिपत्तिः।। ।।आदितएकोनविंशः।। ।।१९।। राम २७

प्राचुर्येणकन्याविविक्तदर्शनस्यालाभेधात्रेयिकांसुप्रियांचोपसर्पयेत्।साचैनामविदितानामनायकस्यभूत्वातद्गुणैरनुरंजयेत्।
तस्याश्चरुच्यान्नायकगुणान्भूयिष्ठंप्रवर्णयेत्।अन्यवरयितॄणांचदोषानभिप्रायविरुद्धान्प्रतिपादयेत्।मातापित्रोश्चगुणानभि
ज्ञतांलुब्धतांचपलतांवाबांधवानांचापाश्चान्याअपिसमानजातीयाःकन्याःशकुंतलाद्याःस्वबुद्ध्याभर्तारंप्राप्यसंप्रयुक्तामोदंतेस्मताः
ताश्चास्यादर्शयेत्।महाकुलेषुसापत्नकैर्बाध्यमानाविद्विष्टादुःखिताःपरित्यक्ताश्चदर्शयेत्।आयतिंचास्यवर्णयेत्।सुखमनुपह
तमेकचारितांवश्यतांनायकानुरागंचवर्णयेत्।समनोरथायांचास्याअपायंसाध्वसंव्रीडांचहेतुभिरवच्छिंद्यात्।दूतीकल्पंचसकल
माचरेत्।त्वामजानंतीनामनायकोबलाद्गृहीष्यतीतितथासुपरिगृहीतंस्यादितिप्रयोजयेत्।प्रतिपन्नामभिप्रेतावकाशवर्तिनींना
यकःश्रोत्रियागारादग्निमानाय्यकुशानास्तीर्ययथास्मृतिहुत्वाचत्रिःपरिणयेत्।ततोमातरिपितरिचप्रकाशयेदिति।अग्निसा
क्षिकाहिविवाहानानिवर्तंतइत्याचार्यसमयः।दूषयित्वाचैनांशनैःशनैःस्वजनेप्रकाशयेत्।तद्बांधवाश्चयथाकुलस्याघंपरिहरंतोदंड
भयाच्चतस्मैएवैनांदद्युस्तथायोजयेत्।अनंतरंचप्रीत्युपग्रहैरनुरागेणचतान्बांधवान्प्रीणयेदिति।गांधर्वेणविवाहेनचेष्टयेत्।

अप्रतिपद्यमानायामनेन शास्त्रिणीमन्यां कुलप्रमदां पूर्वसंसृष्टां प्रीयमाणां चोपगृह्य तया सह विषह्यमवकाशमेनामन्यकार्यापदेशे
नानाययेत्। ततः श्रोत्रियागारादग्निमिति समानं पूर्वेण। आसन्ने च विवाहे मातरमस्यास्तदभिमतदोषैरनुशयं ग्राहयेत्। ततस्तद
नुमतेन प्रातिवेश्यभवने निशि नायकः श्रोत्रियागारादग्निमाहृत्येति समानं पूर्वेण। ज्येष्ठं वा [illegible] भ्रातरं समानवयसं वेश्या
सु परस्त्रीषु वा प्रसक्तमसुकरेण साहाय्यदानेन प्रियोपग्रहैश्च सुदीर्घकालमनुरंजयेत्। अंते च स्वमभिप्रायं ग्राहयेत्। प्रायेण हि युवानः
समानशीलव्यसनवयसां वयस्यानामर्थे जीवितमपि त्यजंति। ततस्तेनैवान्यकार्यापदेशेन तामानाययेत्। विषह्यमवकाशमिति समा
नं पूर्वेण। अष्टमीचंद्रिकादिषु च धात्रेयिका मदनीयमेनां पाययित्वा किंचिदात्मनः कार्यमुद्दिश्य नायकस्य विषह्यं देशमानाययेत्। तत्रै
नां मदात्संज्ञामप्रतिपद्यमानां दूषयित्वेति समानं पूर्वेण। सुप्तां चैकचारिणीं धात्रेयिकां वारयित्वा संज्ञामप्रतिपद्यमानां दूषयित्वेति
समानं पूर्वेण। ग्रामांतरमुद्यानं वा गच्छंतीं विदित्वा प्रभूतसहायो नायकस्तदा रक्षिणो वित्रास्य हत्वा वा कन्यामपहरेदिति विवाहयोगाः। राम
पूर्वः पूर्वः प्रधानं स्याद्विवाहो धर्मतः स्थितेः। पूर्वाभावे ततः कार्यो यो य उत्तर उत्तरः। व्यूढानां हि विवाहानामनुरागः फलं यतः। मध्यमोपि २८

हि सद्योगो गांधर्वस्तेन पूजितः॥ सुखत्वादबहुक्लेशात्प्रयोगाचरणादपि। अनुरागात्मकत्वाच्च गांधर्वः प्रवरो मतः॥ ॥इति कन्या
संप्रयुक्तके तृतीयेधिकरणे पंचमोध्यायः॥ ॥विवाहयोगाः॥ आदितो विंशः॥ ॥इति समाप्तं कन्यासंप्रयुक्तकं तृतीयमधिकरणं
॥ ॥भार्यैकचारिणी गूढविस्रंभा देववत्पतिमानुकूल्येन वर्तेत। तन्मतेन कुटुंबचिंतामात्मनि संनिवेशयेत्। वेश्म च शुचि सुसंमृ
ष्टस्थानं विरचितविविधकुसुमं श्लक्ष्णभूमितलं हृद्यदर्शनं त्रिषवणं विर[illegible]चितबलिकर्म पूजितदेवायतनं कुर्यात्। न ह्यतोन्यद्गृ
हस्थानां चित्तग्राहकमस्तीति गोनर्दीयः। गुरुषु मित्रवर्गेषु भृत्येषु नायकभगिनीषु तत्पतिषु च यथार्थं प्रतिपत्तिः। परिपूतेषु स्थानेषु ह
रितशाकवप्रानिक्षुस्तंबाञ्जीरकसर्षपाजमोदशतपुष्पातमालगुल्मांश्च कारयेत्। कुब्जकमल्लिकाजातीकुरंटकनवमालि
कानंद्यावर्तजपागुल्मानन्यांश्च बहून्पुष्पविशेषान्। बालकोशीरकपातालिकाश्च। वृक्षवाटिकायां चोच्छ्रितानि तृणानि अकंटका
नि च स्थंडिलानि। सामान्येषु देशेषु कूपं वापीं दीर्घिकां वा खानयेत्। भिक्षुकीश्रमणाकुलटाकुहकेक्षणिकामूलकारिकाभिर्न संसृ
ज्येत। भोजने च रुचितमिदमस्मै द्वेष्यमिदं पथ्यमिदमपथ्यमिदमिति च वि[illegible]द्यात्। स्वरमागच्छतो बहिरुपश्रुत्य किं कृत्यमिति सज्जा भवनमध्ये

परिजननियमनं।उत्सवेषु चास्य पूजनमिति एकचारिणीवृत्तं।प्रवासे च मंगलमात्राभरणा दैवतोपवासपरा वार्त्तायां स्थिता गृहान
वेक्षेत।शय्या गुरुसमीपे।तदभिमतकार्यप्रतिपत्तिः।नायकाभिमतानां च द्रव्याणामुपार्जने प्रतिसंस्कारे च यत्नः।नित्यनैमित्तिकेषु
कर्मसु मितो व्ययः।तदारब्धानां कर्मणां समापने मतिः।ज्ञातिगृहागमनमन्यत्र व्यसनोत्सवाभ्यां।तत्रापि नायकपरि जनानुयाना
यानातिकालमवस्थानं।अपरिवर्तितप्रवासवेषता।गुरुजनानुज्ञातानां करणमुपवासानां।परिचारकैः शुचिभिराज्ञाधिष्ठितै
रनुमतानां क्रयविक्रयकर्मणां सारस्याप्यायनं।तनूकरणं शक्त्या व्ययानां।आगते च प्रकृतिस्थाया एव दर्शनं।दैवतपूजनमुपहा
राणां चाहरणमिति प्रवासचर्या।सद्भावमनुवर्तेन नायकस्य हितैषिणी।कुलयोषा पुनर्भूर्वा वेश्या वाप्येकचारिणी।धर्ममर्थं तथा
कामं लभेते स्थानमेव च।असपत्नं च भर्तारं नार्यः सद्वृत्तमाश्रिताः॥ ॥इति भार्याधिकारिके चतुर्थेऽधिकरणे प्रथमोऽध्यायः॥ ॥एकचा
रिणीवृत्तं॥प्रवासचर्या च।आदित एकविंशः॥ ॥जाड्यदौःशील्यदौर्भाग्येभ्यः प्रजानुत्पत्तेराभीक्ष्ण्येन दारिकोत्पत्तेर्नायकचापलाद्वास राम
पत्न्याधिवेदनं।तदादित एव भक्तिशीलवैदग्ध्यख्यापनेन परिजिहीर्षेत्।प्रजानुत्पत्तौ च स्वयमेव सापत्नके चोदयेत्।अधिविद्यमाना ३०

चयावद्बलं योगादात्मनोऽधिकत्वे स्थितिं कारयेत्।आगतां चैनां भगिनी कामिव वीक्षेत।नायकविदितं च प्रादोषिकं विधिमतीवय
त्नादस्याः कारयेत्।सौभाग्यजं वैकृतमुत्सेकं वा अस्या नाद्रियेत।भर्त्तरि प्रमाद्यन्तीमुपेक्षेत।यत्र मन्येतार्थमियं स्वयमपि प्रतिपत्स्य
त इति तत्रैनामादरत एवानुशिष्यात्।नायकसंश्रये रहसि विशेषानधिकान्दर्शयेत्।तदपत्येष्वविशेषः।परिजनवर्गेऽधिकानुकंपा।मि
त्रवर्गे प्रीतिः।आत्मज्ञातिषु नात्यादरः।तज्ज्ञातिषु चातिसंभ्रमः।बह्वीभिस्त्वधिविन्ना अव्यवहितया संसृजेत।यां तु नायकोऽधिकां
चिकीर्षेत्तां भूतपूर्वसुभगया प्रोत्साह्य कलहयेत्।ततश्चानुकंपेत।ताभिरेकत्वेनाधिकां चिकीर्षितां स्वयमविवदमाना
दुर्जनीकुर्यात्।नायकेन तु कलहितामेनां पक्षपातावलंबनेनोपबृंहितामाश्वासयेत्।कलहं च विवर्धयेत्।मंदं वा कलहमुपलभ्य
स्वयमेव संधुक्षयेत्।यदि नायकोऽस्यामद्यापि सानुनय इति मन्येत तदा स्वयमेव संधाने प्रयतेतेति ज्येष्ठावृत्तं।कनिष्ठा मातृवत्सपत्नीं
पश्येत्।ज्ञातिदायमपि तस्या विदितं नोपयुंजीत।आत्मवृत्तान्तांश्च तदधिष्ठितान्कुर्यात्।अनुज्ञाता पतिमधिशयीत।न चास्या
वचनमन्यस्याः कथयेत्।तदपत्यानि च स्वेभ्योऽधिकानि पश्येत्।रहसि पतिमधिकमुपचरेत्।आत्मनश्च सपत्नीविकारजं दुःखं ना

स्त्रीनापत्यकृश्चैवेशेषिकं रूढं मानेलिखितेन। अनेन खलु पथ्यमनेन जीवामीति रूपात्। न तु श्लाघपारागेण वा बहिर्न्यासचलन। मित्र
रहस्यानेतुरवज्ञो लभते। ज्येष्ठाभयाच्च निगूहस्त्सानाथिनी स्यादिति गोनर्दीयः। दुर्भगामनपत्यां च ज्येष्ठामनुकंपेत। नायकेन
चानुकंपयेत्। प्रसह्य त्वेनामेकचारिणीवृत्तमनुतिष्ठेदिति कनिष्ठावृत्तं। विधवा त्विंद्रियदौर्बल्यादातुरा भोगिनी गुणसंपन्नं च यापु
नर्विंदेत्सा पुनर्भूः। यतस्त्वेच्छया पुनरपि निःक्रमणं स्यान्निर्गुणे च मिति नदाकांक्षेदिति बाभ्रवीयाः। सौख्यार्थिनी सा किल पुनर्वि
दंति। गुणेषु सोपभोगेषु सुखमाकल्यानस्माततो विशेष इति गोनर्दीयः। आत्मनश्चित्तानुकूल्यादिति वात्स्यायनः। सा बांधवैर्नाय
कादापानकोद्यानश्रद्धादानमित्रपूजनादिषु व्ययसहिष्णुकमलिप्सेत। आत्मनः सारेण वा। अलंकारं तु नदीयमात्मी
यं वा बिभृयादिति भी निदायेष्वनियमः। स्वेच्छया च निर्गच्छेत्प्रीतिश्रमिवायादन्यच्चायकदन्नं जीर्येत निःक्रामयमानानुनकिंचिद्दद्यात्।
सा प्रभविष्णुरिव नस्यभवनमानुयात। कुलजासु तु प्रेष्यवद्वर्तेत दाक्षिण्येन परिजने सर्वत्र सपरिहासा मित्रेषु प्रतिपत्तिः। कलो राम
सु कौशलस्याधिकस्य ज्ञापनं। कलहस्थानेषु च नायकं स्वयमुपालभेत। रहसि कसेलचतुःषष्ट्यानुवर्तेत। स्वयं सपत्नीनामु ३१

पकुर्यात्। नदयस्यानिस्वामिवदुपचरेत्। मंडलीकान्याद्दरेण कुर्वीत। परिजने मित्रवर्गे च विस्रंभणं विश्राणनं च समाजापान
कोद्यानयात्राविहारशीलत्वमाचेष्टितुं न पूर्ववृत्तं। दुर्भगानु सापत्न्यपीडिता या तासामधिकमिव पत्यानुपचरेत्। तासां श्रये तत्कारया
निकला विज्ञानानि दर्शयेत्। नायकापत्यानां धात्रीकर्माणि कुर्वीत। तन्मित्राणि चोपगृह्य तैर्भक्तिमात्मनस्तेः प्रकाशयेत्। धर्मकार्ये
षु च पुरश्चारिणी स्यात्। व्रतोपवासयोश्च। परिजने दाक्षिण्यं। न चाधिकमात्मानं पश्येत्। शयने च तत्सात्म्येन तदनुरागप्रत्यानयनं
चोपलभेत्। वामता न तु दर्शयेत्। यया कलहितस्यात्तामस्योपावर्तयेत्। यां च प्रच्छन्नां कामयेत तामनेन संगमयेत्। मर्माणि चास्या
व बुध्येत्। गोपयेच्च। यथा च पतिव्रतात्वमशाठ्यं च नायको मन्येत तथा विदध्यादिति दुर्भगावृत्तं। अंतःपुराणं च रहस्ये तेनैव प्रकारेण दुर भंगा
लक्षयेत्। माल्यानुलेपनवाससां च तासां कंचुकीवा महत्तरिकावा राज्ञे निवेदयेयुः। तदादाय राजा निर्माल्यमासां प्रतिप्राभृतं दद्या
त्। अलंकृतः स्वलंकृतानि वापराह्णे सर्वाण्यंतःपुराणि पश्येत्। तासां यथाकालं यथार्हं च स्थानमानातुष्टत्री। सपरिहासा कृ
श्रा थां कुर्यात्। तदनंतरं पुनर्भुवस्तथैव पश्येत्। ततो वेश्याः। आभ्यंतरिकास्ततो नाटकीयाश्च। तासां यथोक्तकक्षाणि स्थानानि। वासक

बालकयस्या वासको पश्चान्नीनुस्नपरिचारिकानुगता दिवाशय्योत्थितस्य राज्ञस्ताभिः प्रहितमंगुलीयकं कुंकुमानुलेपनं ऋतुवा
सकं च निवेदयेयुः।तत्र यद्राजा प्रतीयात् तस्या वासकमाज्ञापयेत्।उत्सवेषु च सर्वासामानुरूप्येण पूजा आपानकं च। संगीतदर्श
ने चैतं रवासिनीनां बहिरनिःक्रमाः बाह्यानामप्रवेशाः। अन्यत्र विदितशौचाभ्यो ऽपरिक्लिष्टस्वधर्मीयोग इत्यांतःपुरिकं। पुरुष
स्य बहूनदारानभिसमाहतसमो भवेत्। न चावज्ञां चैरदासु व्यलीकान्सहेत च। एकस्यां या रतिक्रीडा विकृतं वा शारीरजं। विश्रंभादातु
पालंभं तमन्यासु न कीर्त्तयेत्। न दद्यात्प्रसरं स्त्रीणां सपत्न्याः कारणे कश्चित्। तथोपालंभमानां च दोषैस्तामेव योजयेत्। अन्यां रहसि
विश्रंभैरन्यां प्रत्यक्षपूजनैः बहुमानैस्तदा चान्यामित्येवं रंजयेत्स्त्रियः। उद्यानगमनैर्भोगैर्दानैस्तज्ज्ञातिपूजनैः। रहस्यैः प्रीतियोगैश्च स
र्वासामनुरंजयेत्।। युवतिश्च जितक्रोधा यथाशास्त्रप्रवर्तिनी। करोति वश्यं भर्तारं सपत्नीश्चाधितिष्ठति।। ॥ इति भार्याधिकारिके
चतुर्थेऽधिकरणे द्वितीयोऽध्यायः॥ २॥ ॥ सपत्नीषु ज्येष्ठावृत्तं कनिष्ठावृत्तं। पुनर्भूवृत्तं। दुर्भगावृत्तं। आंतःपुरिकं। पुरुषस्य ब राम
ह्वीषु प्रतिपत्तिः। समाप्तं चेदं भार्याधिकारिकं चतुर्थमधिकरणं। आदितो द्वाविंशः॥ २२॥ ॥ व्याख्यातं कारणं परपरिग्रहोपग ३२

मात्येषु साध्यत्वमनत्ययं गम्यत्वमायतिं वृत्तिं चादितः परीक्षेत। यत्र चास्थानास्थानानां तरं कामं प्रतिपद्यमानं पश्येत्तत्र शारीरोपघा नत्र
तत्राणार्थं परपरिग्रहानप्युपगच्छेत्।। दश तु कामावस्थाः।। तास्तु चक्षुःप्रीतिः। मनःसंगः। संकल्पोत्पत्तिः। निद्राच्छेदः। तनुता। विषयेभ्यो
व्यावृत्तिः। लज्जाप्रणाशः। उन्मादः। मूर्छा। मरणमिति तासां लिंगानि। तत्राकृतितो लक्षणतश्च युवत्याः शीलसत्यशौचादि साध्या
मदुबे साध्यतां चंडवेगतां च लक्षयेदित्याचार्याः। व्यभिचारादाकृतिलक्षणयोगानामिंगिताकाराभ्यामेव प्रवृत्तिरवबोद्धव्या योषित इति वात्स्या
यनः। यं कं चिदुज्ज्वलं पुरुषं दृष्ट्वा स्त्री कामयते। तथा पुरुषोऽपि योषितं। अपेक्षया तु न प्रवर्तत इति गोणिकापुत्रः। तत्र स्त्रियं प्रति वि
शेषः। न स्त्री धर्ममधर्मं चापेक्षते। कामयत एव परं। कार्यापेक्षया तु नाभियुंक्ते। स्वभावाच्च पुरुषेणाभियुज्यमाना चिकीर्षत्यपि व्यावर्तते।।
त्रिप्रायतया तु दृश्यमानोऽप्यभियुज्यमानोऽपि न सिध्यति। निःकारणमपि चाभियुंक्ते। अभियुज्यापि तु नाभियुंक्ते। सिद्धायां च माध्यस्थ्यमपि
गच्छति। सुलभामवमन्यते दुर्लभामाकांक्षतीति प्रायोवादः। तत्र व्यावर्तनकारणानि। पत्यावनुरागः। अपत्यापेक्षा। अतिक्रांतवयस्त्वं
त दुःखाभिभवः। विरहानुपलंभः। अवज्ञयोपमंत्रयत इति क्रोधः। अप्रत्ययः इति संकल्पवर्जनं। गमिष्यतीत्यनायतिः। अन्यत्र सक्तमति

निवा। असंस्तुताकार इत्युद्वेगः। मित्रेषु निसृष्टभाव इति। तेष्ववेक्षा। शुष्काभियोगीत्याशंका। तेजस्वीति साध्वसं। उद्वेगः समयो विमि
नयं भृग्यः। नागरिकः कलासु विचक्षण इति व्रीडा। सखित्वेनोपचरितमिति च। अदेशकालज्ञ इत्यसूया। परिभवस्थानमिति बहुमा
नः। आकारितोऽपि न बुध्यत इत्यवज्ञा। शशो मंदवेग इति च हस्तिन्या। मत्तोऽस्य मा भूदनिष्टमित्यनुकंपा। आत्मनि दोषदर्शनान्निर्वेदः।
विदिता सती स्वजनबहिःकृता भविष्यामीति भयं। पलित इत्यनादरः। पत्या प्रयुक्तोऽयं मां परीक्षत इति विमर्शः। धर्मापेक्षा चेति। तेषु यदात्म
नि लक्षयेत्तदादित एव परिच्छिंद्यात्। आर्यत्वयुक्तानि रागवर्द्धनात्। अशक्तिजामुपायप्रदर्शनात्। बहुमानकृतामतिपरिचयात्। परि
भवकृतामतिशौंडीर्यवैचक्षण्यात्। तत्परिभवजामतिप्रणत्या। भययुक्तामाश्वासनादिति। स्त्रीपुरुषयोस्त्वमी प्रायेण सिद्धाः। काम
सूत्रवेत्ता। कथाख्यानकुशलो बाल्यात्प्रभृति संसृष्टः। प्रवृद्धयौवनः। क्रीडनकादिनागतविश्वासः। प्रेषणस्य कर्ता। उचितसंभाषणः।
प्रियस्य कर्ता। अन्यस्य भूतपूर्वो दूतः। अस्या अपि मर्मज्ञः। उत्तमया प्रार्थितः। सख्या प्रच्छन्नसंसृष्टः। सुभगाभिख्यातः। सहसंवृद्धः। राम
प्रतिवेश्यः। कामशीलः। तथाभूतः परिचारकः। धात्रेयिकापरिग्रहः। नववरकः। प्रेक्षोद्यानत्यागशीलः। वृष इति सिद्धप्रतापः। साह ३३

सिकः। विद्यारूपगुणोपभोगैः पत्युरतिशायिनां महार्हवेषाचारश्चेति। अयत्नसाध्यास्त्विमाः। अभियोगमात्रसाध्याः। द्वा
रदेशावस्थायिनी। प्रासादाद्राजमार्गविलोकिनी। तरुणप्रातिवेश्यगृहे गोष्ठीयोगिनी। सततप्रेक्षिणी। प्रेक्षिता पार्श्वविलोकिनी। निष्का
रणं सपत्न्याधिविन्ना। भर्तृद्वेषिणी। विद्विष्टा च। परिहाररहिता च। निरपत्या। ज्ञातिकुलनित्या। विपन्नापत्या। गोष्ठीयोगिनी। प्रीतियोगिनी।
कुशीलवभार्या। मृतपतिका बाला। दरिद्रा बहूपभोगा। ज्येष्ठस्य भार्या बहुदेवरिका। बहुमानिनी न्यूनभर्तृका। कौशलाभिमानिनी। भर्तृ
मौर्ख्येणोद्विग्ना। अविशेषतया लोभेन च कन्याकाले न यत्नेन वरिता कथंचिद्विलब्धाभियुक्ता च नेदानीं समानशीलबुद्धिमेधाप्र
पत्तिसात्म्या प्रकृत्या पक्षपातिनी। अनपराधे विमानिता। तुल्यरूपाभिश्चाधःकृता। प्रोषितपतिका इति। ईर्ष्यालुपूतिचोक्षक्लीबदीर्घसू
त्रका पुरुषकुब्जवामनमणिकारविरूपग्राम्यदुर्गंधिरुग्णरोगिवृद्धभार्याश्चेति। इच्छा स्वभावतो जाता क्रियया परिबृंहिता। बुद्ध्या च
संधितोद्वेगा स्थिरा स्यादनपायिनी। सिद्धतामात्मनो ज्ञात्वा लिंगान्युन्नीय योषितां। व्यावृत्तिकारणोच्छेदी नरो योषित्सु सिध्यति। ॥६
इति पारदारिके पंचमेऽधिकरणे प्रथमोऽध्यायः। ॥ स्त्रीपुरुषशीलावस्थापनं। व्यावर्तनकारणानि। स्त्रीषु सिद्धाः पुरुषाः। अयत्नसाध्या

मोषितनइत्यादिमत्रयोविंशः॥ ॥कन्यास्वयमभियोगसाध्यानन्यथाहस्ता। परस्त्रियस्तुसूक्ष्मभावाद्दूतीसाध्यानन्यथास्तनेत्याचा
र्यः। सर्वत्रशास्त्रविषयेस्वयंसाधनमुपपन्नतरकं। दुरुपपादत्वात्तस्यदूतीप्रयोगइतिवात्स्यायनः। प्रथमंसाहसाभियंत्रणसं
भाषाश्चस्वयंप्रयान्ति। नहिपरीनाश्चह्नस्तेभिप्रायोवादः। स्वयमभियुज्यमानेस्वादावेवपरिचयंकुर्यात्। तस्याःस्वाभाविकंदर्शनंप्रा
यत्निकेच। स्वाभाविकमात्मनोभवनसन्निकर्षे। प्रायत्निकंमित्रज्ञातिमहामात्रवैद्यभवनसन्निकर्षेविवाहयज्ञोत्सवव्यसनोद्यान
गमनाचारेषुदर्शनेचास्यांसाकारंसततंप्रेक्षणं। केशसंयमनं। नखाच्छुरणं। अधरोष्ठविमर्द्दनं। आभरणप्र[illegible]स्वनं। नासाश्चवय का
स्यैःसार्द्धंलीलाः। प्रेक्षमाणायास्तत्सेवंहाव्यापरापदेशिनश्चकथाः। त्यागोपभोगप्रकाशानांसख्युस्तत्संगेनिवसत्यस्यसांगमंगंहृभ
णंएकश्लेषः। मृदंवाक्यनां। नहास्यसंश्रवणं। मामुद्दिश्यबालेनान्यजनेनसहान्यापदिष्टाद्यर्थाःकथाः। तस्यांस्वयंमनोरथावेदनं।
अन्यापदेशेननामैवोद्दिश्यभूमिविलिखनं। बालस्यचुंबनमालिंगनंचाजिह्वयाचास्यतांबूलदानं। प्रदेशिन्याहनुघट्टनंच। तत्रतत्रय राम
थावकाशंप्रयोक्तव्यं। तस्याश्चांकगतस्यलालनं। क्रीडनकानांचास्यदानं। ग्रहणेनचानेनसन्निकृष्टत्वात्। कथायोजनं। तत्संभाषणक्षमेण ३४
ने॰

चजनेनसहप्रीतिमासज्यकार्ययोगः। तदनुबंधंचगमनागमनप्रयोजनं। संश्रवेचास्याःकामपरवशतोनामकामसूत्रसंकथा।
प्रसंगेचपरिचयेनस्याहस्तेन्यासंनिक्षेपंचवृद्ध्यावश्च्यं। प्रतिक्षणंप्रतिदिनंचैकदेशानोरहितांशानां। यत्तत्सौगंधिकंपूगफलानिचनाम
त्मनोद्वारैःसहविश्रंभगोष्ठ्यांविविक्तासनेचयोजयेत्। नित्यदर्शनार्थंचसुवर्णकारमणिकारवैकटिकनीलीकुसुंभरंजकादिषु
कर्मार्थिन्यामात्मनःश्चवश्यैरेषांसंपादनेचयोजयेत्। स्वयंप्रयत्नेनतदनुष्ठानरतस्यचलोकेविदितोदीर्घकालदर्शनयोगस्त
स्मिंश्चान्येषामपिकर्मणामनुसंधानं। येनकर्मणाद्रव्येणकौशलेनचार्थिनीस्यात्तस्यप्रयोगमुत्पत्तिमागममुपायविज्ञानेचात्म
यत्तेदर्शयेत्। पूर्वप्रवृत्तेषुचलोकचरितेषुद्रव्यगुणपरीक्षासुचतयासहपरिजनेनचसहविवादः। तत्रनिर्दिष्टानिविपणितानितेषु
नांप्राश्निकत्वेनयोजयेत्। तयातुविवदमानोन्यतरउक्तमितिकुर्यात्॥ ॥इतिपरिचयकारणानि॥ ॥कृतपरिचयांदर्शितेंगिताका
रांकन्याभिनोपायतोभियुंजीतेति। प्रायेणतुतत्रसूक्ष्माभियोगाः। कन्यानामसंप्रयुक्तत्वात्। इतरासुमानेवस्फुटमुपपद्यानुप्रव
नत्वात्संदर्शिताकारायांनिर्भिन्नभावायांतद्व्याणिगोष्ठीगमनोपभोगव्यतिकरेष्वनीयोपयुंजीत। उत्तरीयकांगुलीयककुसुमपरि

वर्त्तनं। तत्र महार्हगंधमाल्यस्यानदुस्ताञ्चलोद्ध्वग्रहणं। गोष्ठीगमनोद्यतस्य तत्केशहस्तकुसुमयाचनं। स्वयं तु दद्यान्महार्हगं
धं स्पृहणीयं नखदशनपदचिह्नितं साकारं च दद्यात्। अधिकैरधिकैश्चाभियोगैः साधससंविच्छेदनं। क्रमेण च विविक्तदेशे गम
नं। आलिंगनं चुंबनं। तांबूलस्य ग्रहणं। दाने पुष्पाणां च परिवर्त्तनं। गुह्यदेशाभिमर्शनं चेत्यभियोगाः। यत्र चैकाभियुक्तां न तत्र प
रामभियुंजीत। यत्र प्राहृत्यानुभूतविषयाभियोपयहे स्यात्तु परिहार्या। अन्यत्र दृष्टसंचारस्तत्तुर्यधिकनायकः। तत्र योषितं क्वा
चित्कृपापामभिलंघयेत्। न्नो किंतो लक्षितां भीतां ससे श्लोकाश्च योषितां नतर्कयेत् मेधावी रक्षन्प्रत्ययमात्मनः॥ ॥इति पारदा
रिके पंचमेधिकरणे द्वितीयोध्यायः॥ ॥परिचयकरणानि अभियोगः। आदितश्चतुर्विंशः॥ ॥२४॥ ॥अभियुंजानो योषितां प्रवृ
त्तिं परीक्षेत। तया भावः परीक्षितो भवति। अभियोगं चेत्प्रतिगृह्णीयात्तत्र मंत्रमरणानां हृत्येनां साधयेत्। अप्रतिगृह्याभियोगं पुन
रपि संसृज्यमानां द्विधाभूतमानसां विद्यात्। तां क्रमेण साधयेत्। अप्रतिगृह्याभियोगं तु विशेषमलंकृता चेत्पुनर्न दर्शयेत्। अभिग काम
च्छेच्च। विविक्ते च बलाद्ग्रहणीयां विद्यात्। बहूनपि विषहते अभियोगान् न च चिरेणापि प्रयच्छत्यात्मानं शुष्कप्रतिग्राहिणी सा परिव ३५

यविघटनसाध्या मनुष्यजातेः चित्तानित्यत्वात्। नाभियुक्तापि परिहरति न च संसृजते न च प्रत्यावष्टेन स्मितासनिवाग्गोरवाभिमा
नात्सानि परिचयात् कृच्छ्रसाध्या। मर्म्मज्ञया दूत्या तां साधयेत्। सा चेदभियुज्यमाना पारुष्येण प्रत्यादिशेदुपेक्षापरुषयित्वापि तु प्रीति
यो जितं साधयेत्। कृच्छ्रचरणसंस्पर्शनं सहते न चावबुध्यते नाम द्विधाभूतमानसा सातत्येन क्षांत्या वा साध्या। समीपे शयानायाः
सुप्तो नाम करमुपरि विन्यसेत्। सापि सुप्तेवैवासीत। जाग्रती तु अपनुदेत्। भूयोभियोगाकांक्षिणी। एतेन पादस्योपरि पादन्यासो व्याख्या
तः। तस्मिन्प्रसृते भूयः सुप्तसंश्लेषणमुपक्रमेत्। तदसहमानां उत्थितां द्वितीयेहनि प्रकृतिवर्त्तिनीमभियोगार्थिनीं विद्यात्। अदृश्य
मानां तु दूतीसाध्या। चिरमदृष्ट्वा पुनरपि प्रकृतिस्थैव संसृज्येत्। कृतलक्षणां तां दर्शितेंगिताकारामुपक्रमेत्। अनभियुक्ताप्याकारयति
विविक्ते चात्मानं दर्शयति। सवेपथुगद्गदं वदति। स्विन्नकरचरणांगुलिः स्विन्नमुखी च भवति। शिरःपीडनसंवाहनयोश्चात्मानं नियोजय
ति। आतुरा संवाहिका। हस्तेनैकेन संवाहयंती द्वितीयेन बाहुना स्पर्शमावेदयति श्लेषयति च। विस्मितभावा निद्रांधा वा परिस्पृशेपेनं
करान्यां निहन्ति। आलिंगेत्कदेशानुर्वेः क्रियपरियानयति। ऊरुमूलसंवाहने नियुक्ता न विसंवादं गच्छति। तत्रैव हस्तमेकमविचलितं न्य

स्वपिति। अंगसंदेशेन पीडितं चिरादपनयति। अप्रतिरुद्धा वा नायकाभियोगं पुनर्द्वितीयेहनि संवाहनायोपगच्छति। नात्यर्थं संसृजति
न च परिहरति विविक्ते भावं दर्शयति निःकारणं वा गूढमन्यत्र प्रच्छन्नदेशात्। सन्निकृष्टपरिचारकोपभोग्या सा चेदाकारितापि तथैव
स्यात्तन्मर्मज्ञया हृत्वा साध्या। व्यावर्तमाना पि तर्कणीयेति भावपरीक्षा। आदौ परिचयं कुर्यात्तत्र च परिभाषणं। परिभाषणं संमिश्र
मिथश्चाकारवेदनं। प्रत्युत्तरेण पश्येच्चेदाकारस्य परिग्रहं। ततो भियुंजीत नरः स्त्रियं विगतसाध्वसः। आकारेण तस्या भावं पाना
री प्राक् प्रदर्शयेत्। क्षिप्रमेवाभियोज्या सा प्रथमे त्वेव दर्शने। श्लक्ष्णमाकारिता या तु दर्शयेत्स्फुटमुत्तरं सापि तत्क्षणसिद्धेति विज्ञेया
रतिलालसा। धीरायामप्रगल्भायां परीक्षिण्यां च यो विधिः। एष सूक्ष्मो विधिः प्रोक्तः सिद्धा एव स्फुटं स्त्रियः॥ ॥३ इति पारदारिके पंचमे
धिकरणे तृतीयोध्यायः॥ ॥भावपरीक्षा आदितः पंचविंशः॥ ॥दर्शितेंगिताकारां तु प्रविरलदर्शनामपूर्वां च दूत्यैव साधयेत्। सै
नां शीलतो नुप्रविश्याख्यानकपटपाठैः सुभगंकरणयोगैः लोकवृत्तान्तैः कविकथाभिः पारदारिककथाभिश्च तस्याः स्वरूपविज्ञा राम
नदाक्षिण्यशीलानुप्रशंसाभिश्च कथमेवंविधायास्तवायमित्थंभूतः पतिरिति चानुशयं ग्राहयेत्। न तव सुभगे दास्यमपि कर्तुं यु ३८

क्तः पतिरिति ब्रूयात्। [illegible] मंदवेगतां शठतामीर्ष्यालुत्वमकृतज्ञतामसंभोगशीलतां कद
र्यतामन्यानि च यानि तस्मिन्गुप्तान्यस्याभ्याशे सतिसद्भावे निश्चायेन संभाषेत। येन च दोषेणोद्विग्नां लक्षयेत्तेनैवानुप्रविशेत्। यदा
सा मृगी तदा नैव शशता दोषः। एतेन वडवाहस्तिनीविषय उक्तः। नायिकाया एव तु विश्वास्यतामुपलभ्योपसर्पणेन प्रथमसाहस
यां सूक्ष्मभावायां चेति गोणिकापुत्रः। सा नायकस्य चरितमनुलोमतां कामितानि च कथयेत्। प्रसृतसद्भावायां तु युक्त्या कार्यशरीर
मित्थं वदेत्। शृणु विचित्रमिदं सुभगे त्वां किल दृष्ट्वा अमुत्रासावित्थं गोत्रपुत्रो नायकश्चित्तोन्मादमनुभवति। प्रकृत्या सुकुमारः क
दाचिदन्यत्रापरिक्लिष्टपूर्वः तपस्वी नेतोऽधुना शक्यमनेन मरणमप्यनुभवितुमिति वर्णयेत्। तत्र सिद्धे द्वितीयेहनि वाचि वक्त्रे दृष्ट्यां
च प्रसादमुपलभ्य पुनरपि कथां प्रवर्तयेत्। शृण्वत्यां चाहल्याजाविमारशाकुंतलादीनन्यानि च तद्वृत्तानि कथयेत्। वृषतां चातुःषष्टि
कविज्ञतां सौभाग्यं च नायकस्य श्लाघनीयतां प्रच्छन्नसंप्रयोगं भूतमभूतं पूर्वं वा वर्णयेत्। आकारं चास्या लक्षयेत्। सापि हसि
तेन संभाषेत। आसने चोपनिमंत्रयेत्। क्व स्थितं शायितं भुक्तं विचेष्टितं किं वा कृतमिति पृच्छति। विविक्ते दर्शयत्यात्मानमाख्यानकान्य

तत्संकथे चिंतयति विजृंभते निःश्वसिति च प्रीतिदायं ददाति। इष्टेषूत्सवेषु च मां स्मरति पुनर्दर्शनानुबंधं विसृजति। साधुवादिनी स-
ती किमिदमशोभनमभिधत्स इति कथामनुबध्नाति। नायकस्य चापल्यशाठ्यसंबद्धान्दोषान्ददाति। पूर्ववृत्तं च तत्संदर्शनं कथयामि मे
गं वा स्वयमकथयंती तूच्यमानमाकांक्षति। नायकमनोरथेषु कथ्यमानेषु सपरिभवं नाम हसति न च निर्वदति। दूत्यास्तामादर्शि-
ताकारां नायकाभिज्ञानैरुपबृंहयेत्। असंस्तुतां तु गुणकथनैरुपबृंहयेत्। नासंसृष्टाकारयोरसंस्तुतयोर्दूत्यमस्तीत्यौद्दालकिः।
असंस्तुतयोरपि संसृष्टाकारयोरस्तीति बाभ्रवीयाः। संस्तुतयोरप्यसंसृष्टाकारयोरस्तीति गोणिकापुत्रः। असंस्तुतयोरपि दूती-
प्रत्ययादिति वात्स्यायनः। तासां मनोहराण्युपायनानि तांबूलमनुलेपनं स्रजमंगुलीयकं वासो वा तेन प्रहितं दर्शयेत्। तेषु तु यथा-
र्थं नायकस्य नखदशनपदानि तानि तानि च चिह्नानि स्युः। वाससि च कुंकुमांकमंजलिं निदध्यात्। पत्रच्छेद्यानि च नानाभिप्रायाकृ-
तीनि दर्शयेत्। लेखपत्रगर्भाणि कर्णपत्राण्यापीडांश्च तेषु च स्वमनोरथाख्यानं। प्रतिप्राभृतदाने चैनां नियोजयेत्। कृतपरस्परप- राम
रिग्रहयोश्च दूतीप्रत्ययः समागमः। स तु देवताभिगमने यात्रायामुद्यानक्रीडायां जलावतरणे विवाहे यज्ञव्यसनोत्सवेष्वग्न्युत्पा- ३७

ते चौरविभ्रमे जनपदस्य चक्रारोहणे प्रेक्षाव्यापारे तेषु तेषु च व्यापारेष्विति बाभ्रवीयाः। सखीभिक्षुकीक्षपणिकातापसीभव-
नेषु सुखोपाय इति गोणिकापुत्रः। तस्या एव तु गृहे विदितनिःक्रमप्रवेशे चिंतितात्ययप्रतीकारे प्रवेशनमुपपन्नं निःक्रमणमविज्ञा-
तकालं च तन्नित्यं सुखोपायं चेति वात्स्यायनः। निसृष्टार्था परिमितार्था पत्रहारी स्वयंदूती मूढदूती भार्यादूती मूकदूती वातदूती ६
चेति दूतीविशेषाः। नायकस्य नायिकायाश्च यथामनीषितमर्थमुपलभ्य स्वबुद्ध्या कार्यसंपादिनी निसृष्टार्था। सा प्रायेण संस्तु-
तपरिभाषयोर्योजिता। अभियुक्ता असंस्तुतभाषणयोरपि कौतुकाच्चानुरूपौ युक्ताविमौ परस्परस्येत्यसंस्तुतयोरपि। कार्यै-
कदेशमभियोगैकदेशं चोपलभ्य शेषं संपादयतीति परिमितार्था। सा दृष्टपरस्पराकारयोः प्रविरलसंदर्शनयोः। संदेशमात्रं प्रापय-
तीति पत्रहारी। सा प्ररूढसद्भावयोः संसृष्टयोश्च देशकालसंबोधनार्था। दूत्येन वा प्रहिता स्वयमेव नायकमभिगच्छेदजानती
नाम तेन सहोपभोगं स्वप्नं कथयेत्। गोत्रस्खलितं वा। भार्यां चास्य निंदेत्। तद्व्यपदेशेन वा स्वामीर्ष्यां दर्शयेत् नखदशनचिह्नितं किंचि-
द्दद्यात् भवतेहमादौ संकल्पितेति चाभिदधीत। मम भार्यया वा ओकाररमणीयेति विविक्ते पर्यनुयुंजीत। सा स्वयंदूती। तस्या

विविक्ते दर्शनं प्रतिग्रहश्च । हृत्यच्छलेनान्याम् अभिसंधाय तस्याः संदेशश्रावणद्वारेण नायकं साधयेत् । तां चोपहन्यात् । सापि स्वयं
दूती । एतया नायको ऽप्यन्यदूतश्च व्याख्यातः । नायकभार्यां मुग्धां विश्वासयंत्रणयानुप्रविश्य नायकस्य चेष्टितानि पृच्छेत् । योगान्
शिक्षयेत् । साकारं मंडयेत् । कोपमेनां ग्राहयेत् । एवं च प्रतिपद्यस्वेति श्रावयेत् । स्वयं वास्यां नखदशनपदानि निर्वर्तयेत् । तेन
द्वारेण नायकमाकारयेत् । सा मूढदूती । तस्यां तेनैव प्रत्युत्तराणि योजयेत् । स्वभार्यां वा मूढां प्रयोज्य तया सह विश्वासेन योजयित्वा तु
यैवाकारयेत् । आत्मनश्चैव च लक्षण्यं प्रकाशयेत् । सा भार्यादूती । तस्यास्तयैवाकारग्रहणं । बालां वा परिचारिकाम् अदोषज्ञाम् अदुष्टे
नोपायेन प्रहिणुयात् । तत्र स्रजि कर्णपत्रे वा गूढलेखनिधानं नखदशनपदं वा सा मूकदूती । तस्यास्तयैव प्रार्थना । पूर्वप्रस्तुतार्थ
लिंगसंबद्धं स्वजनाग्राहणीयार्थलौकिकार्थद्व्यर्थं वचनमुदासीना या श्रावयेत् इति वातदूती । तस्या अपि तयैव प्रत्युत्तरप्रार्थनमिति
इति दूतीविशेषाः । विधवेक्षणिका दासी भिक्षुकी शिल्पकारिका । प्रविशत्याशु विश्वासं दूतीकार्यं च विंदति ॥ विद्वेषं ग्राहयेत्पत्यौ रमणी राम ३८
त्र याणि वर्णयेत् । विचित्रान् सुरतसंयोगानन्येकानपि दर्शयेत् । नायकस्यानुरागं च पुनश्च रतिकौशलं । प्रार्थनां चाधिकस्त्रीभिरवष्टं

भं च वर्जयेत् । असंकल्पितमप्यर्थमुत्सृष्टमपि कारणात् । पुनरावर्तयत्येव दूती वचनकौशलात् ॥ ॥ इति पारदारिके पंचमे ऽधिकर
णे चतुर्थो ऽध्यायः ॥ ॥ दूतीकर्माणि । आदितः षट्त्रिंशः ॥ ॥ न राज्ञां महामात्राणां वा परभवनप्रवेशो विद्यते । महाजनेन हि चरितमेषां
दृश्यते ऽनुविधीयते च । सवितारमुद्यंतं त्रयो लोकाः पश्यंति अनुगच्छंति । गच्छंतमपि पश्यंत्यनुप्रतिष्ठंते च । तस्मादशक्यत्वाद्गर्हणीयत्वाच्च न ते तं
वृथा किंचिदाचरेयुः । अवश्यं त्वाचरितव्ये योगान् प्रयुंजीरन् । ग्रामाधिपतेरायुक्तकस्य हालोत्कृष्टसुतस्य च यूनो ग्रामीणयो [illegible]
षितो वचनमात्रात् साध्याः । ताश्चर्षण्य इत्याचक्षते विटाः । ताभिः सह विष्टिकर्मसु कोष्ठागारप्रवेशे द्रव्याणां निष्क्रमणप्रवेशयोर्भव
सेस्र नप्रतिसंस्कारे क्षेत्रकर्मणि कार्पासोर्णातसीशणवल्कलादाने सूत्रप्रतिग्रहे द्रव्याणां क्रयविक्रयविनिमयेषु तेषु तेषु संप्रयोगाः । तथा व्र
जयोषाभिः सह गवाध्यक्षस्य । विधवानाथाप्रव्रजिताभिः सूत्राध्यक्षस्य मर्मज्ञभावान्नगरावनः कुलटायोषाभिर्व लीभ्यो भिनत्ति
रिकस्य क्रयविक्रये पण्योपाध्यक्षस्य च । अष्टमीचंद्रकौमुदीसुवसंतादिषु च नगरस्त्रीणां योषितां मीश्वरभवने सहांतःपुरिकाभिः
क्रीडा । तत्रापानकांते नगरस्त्रियो यथापरिचयमंतःपुरिकाणां पृथक् पृथक् भोगावासकान्प्रविश्य कथाभिरासित्वा पूजिताः प्र

पीनाश्चोपप्रदेयं निःक्रमेयुः। तत्र प्रणिहिता राजदासी प्रयोज्या पूर्वसंसृष्टा नागरकसंभाषेन। रामणीयकदर्शने नियोजयेत्। प्रा
गेव स्वभवनस्थां ब्रूयात्। अमुष्यां क्रीडायां तव राजभवनस्थानानि रामणीयकानि दर्शयिष्यामीति। काले च योजयेत्। बहिः प्रवाल
कुट्टिमं दर्शयिष्यामीति मणिभूमिकां वृक्षवाटिकां मृद्वीकामंडपं समुद्रगृहं प्रासादांश्च गूढभित्तिसंचारांश्च अभिभवनं चित्रकर्माणि क्री
नि डनकान् व्याघ्रसिंहपंजरादीनि यानि पुरस्ताद्वर्णितानि स्युः। एकांते च तमीश्वरानुरागं श्रावयेत्। संप्रयोगे चास्य शिल्पं वर्णयेत्। अमं
त्रश्रावं च प्रतिपत्तिं योजयेत्। अप्रतिपद्यमानां च स्वयमीश्वर आयोपचारैः सांत्वनै रंजयित्वा संभूय च सानुरागं विसृजेत्। प्रयो
ज्यायाश्च पत्युरनुग्रहोचितदारा नित्यमंतःपुरमौचित्यात्प्रवेशयेयुः। तत्र प्रणिहिता राजदासीति समानं पूर्वेण। अंतःपुरिका वा प्रयो
ज्यया सह चेटिकासंप्रेषणेन प्रीतिं कुर्यात्। प्रसक्तप्रीतिं सापदेशं दर्शने नियोजयेत्। प्रविष्टां पूजितां पानवर्ती प्रणिहिता राजदासीति
समानं पूर्वेण। नक्षिण्वा विज्ञाने प्रयोज्या सा विख्याता। तद्दर्शनार्थमंतःपुरिका सोपचारं तामाकारयेत्। प्रविष्टां प्रणिहिता राजदा राम·
सीति समानं पूर्वेण। उद्भूतानर्थ भीतस्य भार्यां भिक्षुकी ब्रूयात्। त्वामंतःपुरिका राजनि सिद्धा गृहीतवाक्या मम वचनेन श्रृणोति स्वभा ३९

वनश्च कृपाशीलस्तत्रागमनेनोपायेनाभिगमिष्यामि। स्तानेन तुल्येन पानार्थं निवर्तयिष्यामि। प्रतिपन्नां द्विस्त्रिरिति प्रवेशयेत्। अंतःपुरिका
चास्याः अभयं दद्यात्। अभयश्रवणात् संप्रहृष्टां प्रविष्टां प्रणिहिता राजदासीति समानं पूर्वेण। एतद्वा वृत्त्यर्थिनां महामात्राभि
तप्तानां बलाद्विगृहीतानां व्यवहारदुर्बलानां स्वभोगेनासंतुष्टानां राजनि प्रीतिकामानां बाह्यजने व्यक्तिमिच्छतां सजातीयैर्बाध्यमा
नानां सजातीनां बाधितुकामानां सूचकानामन्येषां च कार्यार्थिनां व्यसनिनां जायाया व्याख्याताः। अन्येन वा प्रयोज्या सह संसृष्टा संग्रा
ह्य दास्य सुपत्नी तामंतःपुरं प्रवेशयेत्। प्रणिधिना वा यमिमस्याः संहृत्य राजदुष्टमिक्र लंगावग्रहोपायेनांतःपुरं प्रवेशयेदिति प्रच्छ
न्नयोगाः। एते राजपुत्रेषु प्रायेण न तु स्वपरभवनमीश्वरः प्रविशेत्। आभीरं हि कोट्टराजं परभवनगतं भ्रातृप्रयुक्तो रजको जघान।
काशिराजं जयत्सेनमश्वाध्यक्ष इति। प्रकाशकामितानि तु देशप्रवृत्तियोगात्। प्रजाजनपदकन्या दशमे हनि किंचिदौपायनिकमुप
गृह्य प्रविशंत्यंतःपुरं भुक्ता एव विसृज्यंते आंध्राणां महामात्रेश्वराणां चांतःपुराणि निशि सेवार्थं राजानमुपगच्छंति वात्सगुल्मकानां। रू
पवतीर्जनपदयोषितः प्रीत्यपदेशेन मासमर्द्धमासं वासयंत्यंतःपुरिका वैदर्भकाणां। दर्शनीयाः स्वभार्याः प्रीतिदायमेव माहा

नारीभिः

त्रराजभ्योदरसपुराजकानां।राजेंक्रीडार्थंनगरस्त्रियोजनपदस्त्रियश्चसंहताः एकशश्चराजकुलंप्रविशंतिसोरा। इकाणामिति
एतेचान्येबहवःप्रयोगाःपारदारिकाः।देशेदेशेप्रवर्त्तंतेराजभिःसंप्रवर्तिताः।नत्वेवंतंप्रयुंजीतराजालोकहितेरतः।निगृहीतारि
षड्वर्गस्तथाविजयतेमहीं॥ ॥इतिपारदारिकेपंचमेधिकरणेपंचमोध्यायः॥ ॥ईश्वरकामितंआदितःसप्तविंशः॥ ॥अंतः
पुराणांरक्षणयोगात्पुरुषदर्शनेनविद्यते।पत्युरेकत्वादनेकसाधारणत्वाच्चातृप्तिस्तस्मात्तानिप्रयोगतएवपरस्परंरंजयेयुः॥
धात्रेयिकांसखींदासींवापुरुषवदलंकृत्याकृतिसंयुक्तैःकंदमूलफलैरपद्रव्यैर्वाभिप्रायंनिर्वर्त्तयेयुः।पुरुषप्रतिमावाव्य
क्तलिंगाश्चाधिशयीरन्॥राजानश्चकृपाशीलाविनापिभावयोगेआयोजितापद्रव्यायावदर्थमेकयारात्र्याबह्वीभिरपिगच्छंति॥
यस्याःप्रीतिर्वासकऋतुर्वानिवेदयंतितत्राभिप्रायात्प्रवर्त्ततइतिप्राच्योपचारः।स्त्रीयोगेणैवपुरुषाणामप्यलब्धवृत्तीनांवियो
उत्त्री निषुविजातिषु प्रतिमासुकेवलोपमर्दनाच्चाभिप्रायनिवृत्तिर्व्याख्याता।योषावेषाश्चनागरकानप्रायेणांतःपुरिकाःपरिचारिका राम
भिःसहप्रवेशयंति।तेषामुपावर्त्तनेपरिचारिकाधात्रेयिकाश्चाभ्यंतरसंसृष्टाआयतिंदर्शयित्वाप्रयतेरन्।सुप्रवेशतामपसार ४०

सु२

भूमिं।विशालतांवेश्मनः।प्रमादंरक्षिणामनित्यतांपरिजनस्यवर्णयेयुः।नचासद्भूतेनार्थेनप्रवेशायितुंजनमुपावर्त्तयेयुः।
ग दोषान्नात्यंतिकत्वमायमप्यंतःपुरमपायभूयिष्ठत्वाच्चप्रविशेत्तु।सापरंतुप्रमदवनावगूढंदीर्घकक्षमल्पप्रमत्तरक्षंप्रो
षितराजकंकारणानिसमीक्ष्यबहुशआहूयमानःकक्षाप्रदेशंदृष्ट्वाताभिर्विहितोपायःप्रविशेत्।शक्तिविषयेचप्रतिदिनंनिःक्र
मेत्।बहिश्चरक्षिभिरन्यदेवकारणमपदिश्यसंसृज्येतांतःपुरचारिण्यांचपरिचारिकायांविदितार्थायांसक्तमात्मानंरूपयेत्।तान
दलाभाच्चशोकं।अंतःप्रवेशिनीभिश्चदूतीकल्पंसकलमाचरेत्।राजप्रणिधींश्चबुध्येप देशाः।अयोज्यायांचरक्षणुबंधंसाभिगिनाका
रनिवेदनं।यत्रसंपातःस्यात्तत्रचित्रकर्मणिस्वयुक्तस्यश्लोकानांद्व्यर्थानांगीतवस्तुकानांक्रीडनकानांकृतचिह्नानामंगुलीयकस्य
निधानं।प्रत्युत्तरंचयत्नाद्दत्तेपश्येत्×।नाहत्वास्त्रसंचारेयत्रगृहीताकारायाःप्रयोज्यायादर्शनयोगस्तत्रावस्थानं।तस्मिंश्चपिपुरुषिक्षिपरिचारिका×
त्वाननःप्रविशेत्।यत्रचास्यानियतंगमनमितिविधानात्तत्रप्रच्छन्नस्यप्रागेवावस्थानंरक्षिपुरुषरूपोवानदद्धत्वानवेलायांप्रवि
शेत्।आस्तरणप्रावरणवेष्टितस्यवानिर्हरणप्रवेशौ।पुटापुटयोगैर्वानिरस्तछायारूपः।तत्रायंयोगः।नकुलहृदयंचोचकाः।र

वीफलानि। स्पर्शक्षीणि चांतर्ईमं प्रवेशयेत्॥ मनोज्ञेनेन्नमभागेन पेटकेन वा सुरुक्तनूयनेन वाष्ठाथा रूपश्चरति। रात्रिषु कौमुदीषु
चेटिकासंबाधेषु तुंगया वा। तत्रैव द्रव्याणामभिनिर्हारे पानकानां प्रवेशने। आपानकोत्सवार्थेषु चेटिकानां तु संभ्रमे।
व्यत्यासे वेश्मनां चैव रक्षिणां च विपर्यये। उद्यानयात्रागमने यात्रातश्च प्रवेशने। दीर्घकालोदयां यात्रां प्रोषिते चापि राजनि। प्रवेश ते
नं भवेत्प्रायो यूनां निःक्रमणं तथा। परस्परस्य मर्माणि ज्ञात्वा चांतःपुरालयाः। एककार्यास्ततः कुर्युः शेषाणामपि भेदने। दूषयित्वा दू
ततोन्योन्यमेककार्यार्पणे स्थिराः। अभेद्यतां गताः सद्यो यथेष्टं फलमश्नुते। तत्र राजकुलचारिण एव पुरुषानलक्षणानंतःपुरा
णि प्रवेशयंति नातिसुरक्षितत्वादपरांतिकानां क्षत्रियसंज्ञकैरंतःपुररक्षिभिरेवार्थसाधयंत्याभीरकाणां प्रेष्याभिःसह नागरका
न् तद्रूपान् निवेशयंति वात्स्यगुल्मकानां स्वैः पुत्रैरंतःपुराणि कामचारैर्जननीवर्जमुपयुंजते वैदर्भकाणां तथा प्रवेशि
भिरेव ज्ञातिसंबंधिभिः स्त्रैराजकानां। ब्राह्मणैर्मित्रैर्भृत्यैर्दाससंज्ञैश्च गौडानां। परिस्पंदाः कर्मकराश्चांतःपुरेषु निषिद्धास्तैश्च तद्रूपा राम
श्च सैंधवानां मर्थेन रक्षिणमुपगृह्य साहसिकाः संहताः प्रविशंति हैमवतानां। पुष्पदाननियोगान्नागरब्राह्मणा राजविदितमंतः ५०

पुराणि गच्छंति पटांतरितश्चैषामालापस्तेन प्रसंगेन व्यतिकरो भवति वंगांगकलिंगानां संहत्य नवदशेत्येकैकं युवानं प्रछाद
यंति प्राच्यानामेवं परस्त्रियः कुर्वीत। एभ्य एव च कारणेभ्यः स्वदारान् रक्षयेत्। कामोपधाशुद्धान् रक्षिणोंतःपुरे स्थापयेदिति आ
चार्याः। ते हि भयेनार्थेन चान्यं योजयेयुरिति। तस्मात्कामभयार्थोपधाशुद्धान् स्थापयेदिति गोणिकापुत्रः। अद्रोहो धर्मस्तमपि भ
याज्जह्यादतो धर्मभयोपधाशुद्धानिति वात्स्यायनः। परवाक्याभिधायिनीभिश्च गूढाकाराभिः प्रमदाभिरात्मदारान् उपदध्याच्छौ
चा शौचपरिज्ञानार्थमिति बाभ्रवीयाः। दुष्टानां युवतिषु सिद्धत्वान्नाकस्माद्दुष्टानां दूषणमाचरेदिति वात्स्यायनः। अतिगोष्ठी निरंकुश
त्वं भर्तुः स्वैरिता पुरुषैः सहानियंत्रणता प्रवासे वस्याने विदेशवासः स्ववृत्त्युपघातः स्वैरिणीसंसर्गः पत्युरीर्ष्यालुता चेति स्त्रीणां
विनाशकारणानि॥ संदृश्य शास्त्रतो योगान्पारदारिकलक्षितान्। न याति छलनां कश्चित्स्वदारान्प्रति शास्त्रवित्। पाक्षिकत्वा
त्प्रयोगाणामपायानां च दर्शनात्। धर्मार्थयोश्च वैलोम्यान्नाचरेत्पारदारिकं। तदेतद्दाररक्षार्थमारब्धं श्रेयसे नृणां। प्रजानां दूषणायै
व न विज्ञेयोस्य संविधिः॥ ॥इति पारदारिके पंचमेधिकरणे षष्ठोध्यायः॥ ॥अंतःपुरिकं दाररक्षितकमिति आदित अष्टाविंशः॥

॥समाप्तंचेदंपारदारिकंपंचममधिकरणं॥ ॥५॥ ॥वेश्यानांपुरुषाभिगमनेरतिर्वृत्तिश्चसर्गतः।रतितश्चस्वाभाविकंप्रवर्त्तनं।
कृत्रिमम्अर्थार्थं।तदपिस्वाभाविकवद्रूपयेत्।कामपराहिपुंसोविश्वासयोगात्।अलुब्धतांचख्यापयेत्तस्यनिदर्शनार्थं।नचानु
पायेनार्थान्साधयेत्।आयतिसंरक्षणार्थं।नित्यमलंकारयोगिनी।राजमार्गावलोकिनी।दृश्यमानानचातिविवृतातिष्ठेत्पण्य
सधर्मत्वात्।नायकमावर्त्तयेत्।अन्याभ्यश्चावच्छिंद्यात्।आत्मनश्चानर्थंप्रतिकुर्यात्अर्थंचसाधयेत्नचगम्यैःपरिभूयेततानुस
त्सनान्सहायान्नेतारक्षिकपुरुषाधर्माधिकरणस्थान्दैवज्ञाविक्रांताःनृसमानविद्याःकलाग्राहिणः।पीठमर्दविटदूषकमाला
कारगांधिकशौंडिकरजकनापितभिक्षवश्चेति।तेनचकार्यभोगान्केवलार्थेत्वभिगम्याः।स्वतंत्रःपूर्वेवयसिवर्तमानःवित्तवान्
अपरोक्षवृत्तिरधिकरणवान्अकृच्छ्राधिगतवित्तःसंघर्षवान्।संततायःसुभगमानी।श्लाघनकः।षंडकःपुंशब्दार्थी।समस्पर्द्धी।
स्वभावतश्चत्यागी।राजनिमहामात्रेवासिद्धः।दैवप्रमाणोवित्तावमानी।गुरूणांशासनातिवर्ती।सजातानांलक्ष्यभूतः।एकपुत्रोलिंगी। राम
प्रच्छन्नकामःशूरोवैद्यश्चेति।प्रीतियशोधिकास्तुगुणिनोधिगम्याः।महाकुलीनोविद्वान्समयज्ञःकविःआख्यानकुशलःवाग्मी ४२

प्रगल्भः।विविधशिल्पज्ञः।वृद्धसेवी।स्थूललक्षः।महोत्साहोदृढभक्तिरनसूयकः।मित्रवत्सलः।घटागोष्ठीप्रेक्षणसमाजसमस्या
क्रीडनशीलः।नीरुजः।अव्यंगशरीरः।प्राणवान्।अमद्यपः।वृषः।मैत्रः।स्त्रीणांप्रणेता।लालयिताच।नचासांवशगः।स्वतंत्रवृत्ति
रनिष्ठुरः।सुवनिघनभिज्ञो।अनीर्ष्यालुः।गोष्ठीकलाप्रियइतिनायकगुणाः।रूपलक्षणमाधुर्ययोगिनीगुणेष्वनुरक्तानित्यमकदर्य
वृत्तिः।गोष्ठीकलाप्रिया।विशेषार्थिनी।गुणैश्चाभिरज्यतेनतथार्थेषु।प्रीतिसंभोगशीला।स्थिरमतिरेकजातीया।चेतिनायिकायागुणाः।
बुद्धिः।शीलमाचारआर्जवं।कृतज्ञतादीर्घदूरदर्शित्वं।अविसंवादिता।देशकालज्ञता।नागरकता।दैन्यातिहासपैशुन्यपरिवादक्रोध
लोभस्तंभचापलवर्जनं।पूर्वाभिभाषिता।कामसूत्रकौशलं।तदंगविद्यासुचेतिसाधारणगुणाः।दोषाःगुणविपर्ययः।क्षयीरोगीकृमि
शकृद्वायसास्यः।प्रियकलत्रः।परुषवाक्।कदर्यः।निर्घृणः।गुरुजनपरित्यक्तः।स्तेनोदंभशीलः।मूलकर्मणिप्रसक्तः।मानापमा
नयोरपेक्षी।द्वेष्यैरप्यहार्यः।अतिलज्जइत्यगम्याः।रागोभयमर्थःसंघर्षोवैरनिर्यातनम्।जिज्ञासापक्षः।खेदः।धर्मोयशोनुकंपा
सुहृद्वाक्यं।ह्रीः।प्रियसादृश्यंधन्यता।रागापनयः।साजात्यम्।सादेश्यं।सातत्यं।अयमभिगमनकारणानिभवंतीत्याचार्याः।अर्थो

नर्थम् नीयात्। आभिरेभिर्वात्स्यायनः॥ अर्थस्तुप्रीत्यानवाप्तेर्नस्य प्राधान्यात्। भयादिषु तु गुरुलाघवपरीक्षा। गमनचिंता। उ
पमंत्रिता पिगम्येन सहसान्न प्रतिजानीयात्। पुरुषाणां स्थूलभावमानितान्। भावजिज्ञासार्थं परिचारकमुखान्संवाहकगायनै
हासिकान् गम्येनउक्तां गौरवणिद्धयात्। तदभावे पीठविमर्हारीन्। तेभ्यो नायकस्य शौचाशौचे। रागापरागौ सक्तासक्ततां दानादाने च विघा
त्। संभाविते न च सह विटपुरोगामुपाभिजनयेत्। लावककुक्कुटमेषयुद्धदर्शनसारिकाप्रलापनप्रेक्षणककलापदेशेन वा। गंविमर्दी
नायकं तस्या उद्वसितमानयेत्। तां वा तस्य। आगतिकौतुकजननं किंचिद्‌द्रव्यजातं स्वयमिदमसाधारणोपभोग्यमिति प्रीतिदायं दद्यात्।
यत्र चाँ रमनेन याषेन सुपचारैश्च रंजयेत्। गते च सपरिहाससंगम्य कोपायनां श्वश्रूपरिचारकान भीक्ष्णं प्रेषयेत्। सपीठमर्दाया श्च
कारणापदेशां स्वयं वा गमनमिति गम्योपावर्तनं। तांबूलानि स्रजश्चैव संस्तनं वा स्लेपनं। आगतस्याहरेत् शीलाकलागोष्ठीश्च योज
येत्। द्रव्याणि प्रणयाद्धयात् कुर्याच्च परिवर्तनं। संप्रयोगस्य वाहने निर्जने चैव प्रयोजयेत्। प्रीतिदायैरुपन्यासैरुपचारैश्च पेशलैः। ग
म्येन सह संसृष्टा रंजयेत्तं ततः परं॥ ॥इति वैशि केषष्ठेऽधिकरणे प्रथमोध्यायः॥ ॥गम्यचिंता। गमनकारणानि। उपावर्तनविधि राम ४३

रिति। आदित एकोनत्रिंशः॥ ॥संयुक्ता नायकेन चरंजनार्थमेकचारिणी वृत्तमनुतिष्ठेत्। रंजयेत्तं तु सजेतनन्तच्चा विचेष्टेत।
संक्षेपोक्तिः। मातरि क्रूरशीलायामर्थपरायां चायत्ता स्यात्। तदभावे मातृकां सानुरागगम्येनना भिप्रायेन। प्रसह्य च दुहितर
मानयेत्। तत्र तु नायकोपाः सन्नतमरतिर्निर्वेदो भयं व्रीडानलेवशासनाभिवृत्तिः। व्याधिश्चैकमजुगुप्सितनमचक्षुरायुर्निमित्त
मनित्यं स्यापयेत्। सनिकारणेन तदपदेशेन च नायकानभिगमनं निर्माल्यस्य तु नायकावेटिकां प्रेषयेत्तांबूलस्य चाव्यवायेत्तदुपचा
रेषु विस्मयश्चतुःषष्ट्यां शिष्यत्वं तदुपदिष्टानां तु योगानांभीक्ष्णेन प्रयोगः। तस्य सात्म्यप्रयोगाद्रहसि वृत्तिर्मनोरथानामाख्यानं। गु
ह्यानां चैव कृतानां प्रच्छादनं। शयनपरावृत्तेस्यानुपेक्षणं चानुलोम्यं च गुह्यस्पर्शनं चास्य सुप्तस्य चुंबनमालिंगनं च। प्रेक्षणमन्यमनस्क
स्य राजमार्गे च प्रासादस्थायास्तत्र विदितायाव्रीडाशाठ्यनाशः। तद्द्वेष्ये द्वेष्यता। तत्प्रिये प्रियता। तद्रस्ये रतिः। तन्मनसो वा शोक
हर्षान्वयो शोकहर्षौ। स्त्रीषु जिज्ञासा। कोपश्चादीर्घः। स्वकृतेऽपि नखदशनचिह्ने चान्यशंका। अनुरागस्यावचनं। आकारस्तु दर्शयेत्। म
दस्वप्नव्याधिषु निर्वचनं। श्लाघानां च नायकगुणानां तस्मिन् प्रत्युत्क्रमणे वाक्यार्थग्रहणं। तद्वधार्थप्रशंसा। विषयेन भाषणे। तद्वाक्यसचीन

रणप्रयोजनं।भक्तिमात्रेचेष्टा।तुष्टिरन्यत्रस्तपल्याः।निःश्वासोजृंभितेस्खलितेपतितेभिन्नेवातस्यानिर्गिमाशांसीन।क्षतन्या
हृतेविस्मितेपुजीवेत्युदाहरणं।मूर्द्धोनस्यव्याधिदोर्हदस्यापदेशोगुणतःपरस्याकीर्तनं।नर्मदा।समानदोषस्यदत्तस्यस्मरणे।स
येकत्नेपराधेमयं।तत्नेनपीडांदर्शयित्।राजोपरोधेव्याध्युपरोधेव्यसनेचालंकारस्याग्रहणं।अभोजनंच।तद्युक्ताश्चविलापाः।त
नसहदेशमोक्षणंरोचयेत्।राजनिःक्रयं।नास्तिक्यमाप्युयोधिगच्छेत्।तद्वाशोसाफल्येतु।तस्याथीभिगमेभिप्रायसिद्धौचारीर
पचयेचेष्टसंभाषितेदेवतोपहारः।नित्यमलंकारयोगः।परिमितोभ्यवहारः।स्निग्धश्चागीतेचनामगोत्रयोर्ग्रहणं।ग्लान्यातुर
ललाटेचकरंकुर्वीत।तत्सुखमुपलभ्यनिद्रालाभः।उत्संगेवास्योपवेशनंस्वपनंच।तस्मात्पुत्रार्थिनीस्यात्।गमनेचवियोगेनचअ
युषआधिक्यमिच्छेत्।एतस्यअभिज्ञानमर्थरहसिनब्रूयात्।व्रतमुपवासंचास्यनिवर्तयेत्ममयिदोषइति।अशक्येस्वयमपितद्
पास्यात्।विवादेतत्वाक्यमित्यर्थनिर्देशः।तदीयमात्मीयंवाविशेषेणपश्येत्।तेनविनागोष्ठ्यादीनामगमनं।निर्माल्यधारणेश्लाघा।उ
च्छिष्टभोजनेच।कुलशीलविद्याजातिवर्णवित्तमित्रदेशगुणवयोमाधुर्यश्लाघा।गीतादिषुचोदनमभिज्ञस्यभयशीतोष्णवर्षा

राम
५४

पनेपश्यतदभिगमनं।सएवमेस्यादिति।ईहिकेचवचनं।तदिष्टरसभावशीलानुवर्तनं।मूलकर्माभिशंका।तदभिगमनेज
न्यासहनित्योविवादः।बलात्कारेणयदप्यन्यत्रनयानीयेत।तदाविषमनशनंशस्त्ररज्जुभिरितिकामयेत।प्रत्यायनंचप्रणिधि
भिर्व्यापितस्य।स्वयंवात्मनोवृत्तिग्रहणं।तद्वेतार्थेषुविवादोमात्राविनातदृष्टिचेष्टेना।प्रवासेशीघ्रागमनायशपथदानंप्रो
षितेमृजानियमश्चालंकारस्यचप्रतिषेधोमंगलंत्वापेक्ष्यं।स्मरणमतीतानांगमनमीक्षणिकोपश्रुतीनां।नक्षत्रसूर्यचंद्रतारा
भ्यःस्पृहणं।इष्टसमदर्शनेतत्संगमोममास्त्वितिवचनं।उद्वेगोनिष्टेशांतिकर्मचाप्रत्यागतेकामपूजा।देवतोपहाराःसखीभिःपूर्णपा
त्रग्रहणं।वायसपूजाच।प्रथमसमागमानंतरंचैनदेवंवायसपूजावर्ज।शक्तस्यचानुसरणंब्रूयात्।निसृष्टभावःसमानवृत्ति
प्रयोजनकारीनिराशंकोनिरपेक्षोर्थेष्विविशक्तलक्षणं।तदेवंनिदर्शनार्थंदत्तकशासनादुक्तमनुक्तंचानुशीलयेल्लोकात्पुरुषप्र
कृतेश्च।सूक्ष्मत्वादतिलोभाच्चप्रकृत्याज्ञानतस्तथा।कामलक्ष्मतुदुर्ज्ञानंस्त्रीणांतद्भावितैरपि।रज्यंतेरमयंत्यश्चरंजयंतित्यजंतिच।आकृ
र्षयंत्यपिसर्वार्थिज्ञायंतेनैववोषितः।। ।।इतिवैशिकेषष्ठेधिकरणेद्वितीयोध्यायः।। ।।कांतानुवृत्तंआदितस्त्रिंशः।। ।।छ।।

शकारस्वाभाविकं विना दानमुपायानस्वाभाविकं सेकल्पितं न स समधिकं वा लभमाना नोपायान् प्रयुंजीतेत्याचार्याः। विदि
तमप्युपायैः परिक्लृप्तं द्विगुणं दास्यतीति वात्स्यायनः। अलंकारभक्ष्यभोज्यपेयमाल्यवस्त्रगंधद्रव्यादीनां व्यवहारे विशुकालिकस्तु
द्वार्थं। अर्घप्रतिनृपत्नेनेत समस्तं द्वित्रप्रशंसा। अनतृष्णारामदेवकुलतडागोद्यानोत्सवप्रीतिदायव्यपदेशात् तदभिगमननि
मित्तारक्षिभिश्चोरैर्वालंकारपरिमुष्टिः दाहात् कुड्यवेदात् समादाद्रवनेनाद्वा। अन्यथा याचितालंकाराणां च तदभिगमनार्थस्य व्य
यस्य च प्रणिधिभिर्निवेदनं। तदर्थमृणग्रहणेन जनन्या सह तदुद्भवस्य व्ययस्य विवादः। सुहृदां कार्येष्वनभिगमनमभिहारहेतो
निश्च पूर्वमाहृता गुरवोऽभिहाराः पूर्वमप्राभिताः स्तुः। उचितानां क्रियाणां व्युच्छित्तिः। नायककार्थे वैशिल्पिषु कार्यं वैद्यमहामात्रयोरुप
क्रियाकार्यहेतोः मित्राणां चोपकारिणां व्यसने। उत्सवेष्वप्युपपत्तिः गृहकर्मसख्याः पुत्रस्योत्संजनं दोहदः। व्याधिर्मित्रस्य दुःखाप
नयनमिति। अलंकारैकदेशविक्रयो नायकस्यार्थे तया शीलितस्यालंकारस्य भांडोपस्करस्य वा वणिजो विक्रयस्यार्थे दर्शनं। प्रति राम
गणिकानां च सदृशस्य भांडस्य व्यतिकरे प्रतिविशिष्टस्य ग्रहणं। पूर्वोपकाराणामविस्मरणं नित्यमनुकीर्तनं च। प्रणिधिभिः प्रति ४५

गणिकानां लाभातिशयं प्रतिश्रावयेत्तासां नायकसमक्षं मालनोभ्यधिकलाभं भूतमभूतं वा व्रीडितानामवर्णयेत् पूर्वयोगि
नां तु लाभातिशयेन पुनः संधाने यतमानानामाविष्कृतः प्रतिषेधः। तत्स्पर्धिनां त्यागयोगिनामभिदर्शनमिति। पुनरेष्यतीति बालया
चितकमित्यर्थाधिगमोपायाः। विरक्तं च नित्यमेव मनः प्रकृतिविक्रियातो मुखवर्णाच्च विद्यात्। ऊनमतिरिक्तं वा ददाति। प्रतिलोमै
लोकैः संबध्यते। व्यपदिश्य पत्यन्यत्करोति। उचितमाछिनत्ति। प्रतिज्ञातं विस्मरति। अन्यथा वा योजयति। स्वपक्षैः संज्ञया भाषते। मित्र
कार्यमपदिश्यान्यत्र शेते। पूर्वसंसृष्टायाश्च परिजनेन सह मिथः कथयति। तस्य च सारद्रव्याणि गवयो धार्यन्यापदेशेन हस्ते
कुर्वीतानाभिचास्या हस्तात् उत्तमवर्णः प्रसह्य प्रतिगृह्णीयात् विवदमानेन सह धर्मस्थेषु व्यवहरेत्। रक्तं तु पूर्वोपकारिणम
ल्पफलमप्यलीकेनानुपलंभेत्। असारं तु निःप्रतिपत्तिकमुपायतोऽपवाहयेत्। अन्यमवष्टभ्य तदनिष्टमेवं निंदिताभ्यासः ८०
ष्टनिर्भोगिः पादेन भूमेरभिघातः। अविज्ञातमविषयस्य संकथा। तद्विज्ञाने च विस्मयः कुत्सा वदर्थविघातः। अधिकैः संगः। अ
नपेक्षणं वा केषु छललग्रहणं। अनर्मणि हासः। नर्मणि वार्यातरमपदिश्य हसेत्। वदतीति स्मित्वा परिजनस्य कटाक्षेक्षणं ताडनं

सहासं।समानदोषणंनिंदा।रतोपचारेषूद्वेगः।स्फुरनस्यादानं।जघनरक्षणं।नखदशनक्षतेभ्योजुगुप्सा।परिष्वंगेभुजमय्यासू
च्याव्यवधानं।स्तब्धगात्रता।श्रांतमुपलभ्यचोदना।अशक्तौहासः।शक्तावनभिनंदनं।सक्थ्नोर्व्यत्यासः।निद्रापरत्वंच।दिवाच
स्याभावमुपलभ्यमहाजनाभिगमनं।आहत्यवास्यकथ्यामन्याःकथाः।नघ्लीकानांनत्र्यसनानांचापरिहार्याणामनुकीर्तनं।
मर्मणांचचेटिकयोपघ्नथनम्।आगमनेचादर्शनं।अंतेचमोक्षइतिपरिग्रहकल्येकृतनकस्य।परीक्षागम्येःसंयोगः संयुक्तस्यानुर
जनं।रक्षार्थस्यिचादानमंतेमोक्षश्चवैशिकं।ए ×अयाच्ययाचनं×वमेनेनकृतेनस्त्रियागावेश्यापरिग्रहे।नाभिसंधेयो।येनेगम्य
करोत्यर्थंश्चपुष्कलान्॥ ॥इतिवैशिकेषष्ठेधिकरणेतृतीयोध्यायः॥ ॥अथवशीगमोपायाः।विरक्तलिंगानि।विरक्तप्रतिपत्तिः।निः
कासनक्रमाः॥आदितएकविंशः॥ ॥वर्तमानंनिपीडितार्थमुत्सृजन्तीपूर्वसंसृष्टेनसहसंदध्यात्॥संधेयोवसितार्थोवित्तवान्
सानुरागश्चेत्ततःसंधेयः।अन्यत्रगतस्तर्कयितव्यः।सकार्यवशात्स्वविद्धः।इतःस्वयमपसृतस्तत्रस्थितोपिस्वयमपसृतः।इतश्च ४राम
ततश्चनिःकासितापसृतः।इतःस्वयमपसृत्यतत्र[illegible]ततोनिःकासितापसृतः।इतःस्वयमेवापसृत्यतत्रस्थितः।इतोपिनिःकासित ४[illegible]

पसृतस्ततोपिनिःकासितोपसृतस्तत्रस्थितइति।इतस्ततःस्वयमपसृत्योपैतिचेदुभयोर्गुणानपेक्षीचलबुद्धिरविसंधेयः
इतस्ततश्चनिःकासितापसृतस्थिरबुद्धिः।सचेदन्यतोबहुलभ्यमानयानिःकासितःस्यात्समानयारोषितःसमेवाबहुदा
स्यतीतिसंधेयः।निःसारतयाकदर्यतयावात्यक्तोनश्रेयान्।इतःस्वयमपसृत्यततोनिःकासितापसृतोयद्यपिरिक्तमादौदद्या
तःप्रतिग्राह्यः।इतःस्वयमपसृत्यतत्रस्थितउपजप्यश्चतर्कयितव्यः।विशेषार्थीगतोविशेषमपश्यन्नागंतुकामोजिज्ञासितुकाम
आगत्यसानुरागत्वाद्दास्यति।तस्यांवादोषान्दृष्ट्वाभूयिष्ठंवागुणानधुनापश्यति।सगुणदर्शीभूयिष्ठंदास्यतीति।बालो
वानैकदृष्टिरभिसंधानप्रधानोवाहरिद्रारागोवायत्किंचित्कारीवेत्यवलोक्यसंदध्यान्नवा।इतोनिःकासितापसृतस्ततःस्वयम
पसृतउपजप्यस्तर्कयितव्यः।अनुरागादागंतुकामःसबहुदास्यतीतिमद्गुणैर्भावितःसोन्यस्यांनरमते।पूर्वमयोगेनवामयानिः
कासितःसमाचलयित्वावैरंनिर्यातयितुकामः।धनमभियोगाद्वामयास्यापहृतंतन्मांविश्वास्यप्रत्यादातुकामोनिर्वेष्टुकामोवा
मांवर्तमानाद्भेदयित्वात्यक्तुकामइत्यवेत्याकल्याणबुद्धिरसंधेयः।अन्यथाबुद्धिःकालेननलंभयितव्यः।इतोनिःका

सितकत्त्रस्थितउपजपयन्नेनेनवाभ्यात॥ नेष्टपजयत्स्त्कअन्यत्रःस्थितःस्वयमुपजपेत्॥ व्यलीकार्थोपनिःक्रासितोमयास्माव
न्यत्रगतोयत्नादानेनव्यःइतः प्रहृत्तसंभाषोवानतोमेदं यास्यामि वर्त्तमानस्यवारव्यविघातंकरिष्यामि॥ अर्थागमकालोप
स्कष्टादृष्टिरस्यजाता॥ लब्धमनेनाधिकृत्यरणंदारैर्वियुक्तः॥ पारतंत्र्याद्यातत्रः पित्राभ्रात्रावा विमुक्तोन्येन प्रतिबद्धमनेन संधिंकृत्वा
नायकंधनिनमत्रोस्याभीतिविमानितोवायुयानस्यांविकारयिष्यामि अस्यवामित्रंममद्वेषिणीकामयतेनाममुनाभेदयिष्यामि॥
चलचित्तयावालाघवमेवैनमापादयिष्यामिति॥ तस्यपीठमर्दादयोमानुदेशिल्येननायिकायाःसत्यप्यनुरागेविवशा याः पूर्वनिः
कासनंहेतुंवर्णयेयुः॥ वर्त्तमानेसकामायाःसंसर्गद्वेषंच॥ तस्याश्चसाभिज्ञानैःपूर्वानुरागैरेनंप्रत्याययेयुः॥ अभिज्ञानंचतत्कतोप
करणसंबद्धंस्यात्॥ इतिविशीर्णप्रतिसाधनं॥ अपूर्वपूर्वसंसृष्टयोःपूर्वसंसृष्टःश्रेयान्॥ सहिविदितशीलोदृष्टानुरागश्चसूपचारोभ
वतीत्याचार्याः॥ पूर्वसंसृष्टो निःपीडितार्थत्वादतिक्रान्तः दुःखश्चनपुनर्विश्वासयितुं पूर्वस्त्कसुखेनानुरज्यतइतिवात्स्यायनः॥ तथापि
तुपुरुषप्रकृतितोविशेषः॥ अन्यामेदयितुंगम्यादन्यतोगम्यमेववा॥ स्थितस्यचापगतार्थंपुनःसंधानमिष्यते॥ विभेत्स्यत्यस्यसंस

र्गात्व्यलीकानिवर्तयिष्यते॥ अतिशक्तःपुमान्यत्रभयाद्बहुददातिच॥ अशक्तमभिनिंदेद्वाशक्तंपरिभवेत्तथा॥ अन्यत्रगतानुपानेनवम
स्यादविशारदः॥ नतोजपितंपूर्वनारीकालेनयोजयेत्॥ नवेत्वाछिन्नसम्बन्धान्नचशक्तंपरित्यजेत्॥ शक्तंतुवशिनंनारीसंभाष्या
प्यन्यतोव्रजेत्॥ न स्थार्थमुपादायशक्तमेवानुरंजयेत्॥ आयतिंप्रसमीक्ष्यादौलाभंप्रीतिंचपुष्कलां॥ सौहार्दंप्रतिसंदध्याद्विशी
र्णस्त्रीविलक्षणं॥ ॥इतिवैशिकेषष्ठेधिकरणेचतुर्थोध्यायः॥ ॥विशीर्णप्रतिसंधानं आदितोद्वात्रिंशः॥ ॥ गम्यबाहुल्ये बहु प्रति
दिनंचलभमानानेकंप्रतिगृह्णीयात्॥ देशंकालंस्थितिमात्मनोगुणान्सौभाग्यंचान्याभ्योन्यूनातिरिक्ततांचावेक्ष्यरजन्यामर्घंस्थाप
येत्॥ गम्येषुदूतांश्चप्रयोजयेत्॥ तत्प्रतिबद्धांश्चस्वयंप्रहिणुयात्॥ द्विस्त्रिश्चतुरितिलाभातिशयप्रतिग्रहार्थमेकस्यापिगच्छेत्॥ प्र
तिपरिग्रहकल्पंवाचरेत्॥ गम्ययौगपद्येतुलाभसाम्येयद्द्रव्यार्थिनीस्यात्तत्रोपितन्निर्विशेषःप्रत्यक्षद्रव्यात्वाचार्याः॥ अप्रत्यादेयत्वा
त्सर्वकार्याणांतन्मूलत्वाद्धिरण्यदइतिवात्स्यायनः॥ सुवर्णरजतताम्रकांस्यलोहभांडोपस्करास्तरणप्रावरणवासोविशेषगंधद्रव्य
कटुकभांडघृततैलधान्यपशुजातीनांपूर्वपूर्वतोविशेषः॥ यत्तत्रसाम्याद्द्रव्यसाम्येमित्रवाक्यादतिपातित्वादायतितोगम्यगु ण

भाविनश्च विशेषः। रागित्यागिनो रागिणि त्यागिनि विशेषः प्रत्यक्ष इत्याचार्याः। शक्यो हि रागिणि त्यागाधानं लुब्धोपि रक्तस्त्यजति न तु त्यागी
निर्बन्धादित्यनाद्रियत इति वात्स्यायनः। तत्रापि धनवदधनवतोर्विशेषः। त्यागिप्रयोजनकर्त्रोः प्रयोजनकर्तुर्विशेषः। प्रत्यक्ष इत्याचार्याः।
प्रयोजनकर्ता सकृत्प्रयोजनेन कृतमात्मानं मन्यते त्यागी पुनरतीतं नापेक्षत इति वात्स्यायनः। तत्राप्यात्ययिकतो विशेषः। कृत
ज्ञत्यागिनोस्त्यागिनो विशेषः प्रत्यक्ष इत्याचार्याः। चिरमाराधितोपि त्यागी व्यलीकमुपलभ्य प्रतिगणिकया वा मिथ्यादूषितः श्रम
मतीतं नापेक्षते। प्रायेण हि तेजस्विन ऋजवोऽनादृताश्च त्यागिनो भवन्ति। कृतज्ञस्तु पूर्वश्रमापेक्षी न सहसा विरज्यते। परीक्षितशी
लत्वाच्च न मिथ्या दूष्यत इति वात्स्यायनः। तत्राप्यात्ययिकतो विशेषः। प्रत्यक्ष इत्याचार्याः। मित्रवचनार्थागमनयोरर्थागमे विशेषः प्र
त्यक्ष इत्याचार्याः। सोऽपि ह्यर्थागमो भवति मित्रं तु सकृद्वाक्ये प्रतिहते कलुषितं स्यादिति वात्स्यायनः। तत्राप्यतिपातितो विशेषः
तत्र कार्यसंदर्शनेन मित्रमनुनीय श्वोभूते तद्वचनं मनोमियानेन मनमर्थं प्रतिगृह्णीयात्। अर्थागमानर्थप्रतीकारयोरर्थागमे राम
न विशेषः प्रत्यक्ष इत्याचार्याः। अर्थः परिमितावच्छेदोऽनर्थः पुनः सकृत्प्रसृतो न ज्ञायते क्वावतिष्ठत इति वात्स्यायनः। तत्रापि गुरु ४८

यो

लाघवकृतो विशेषः। एतेनार्थसंशयेनार्थप्रतीकारयोर्विशेषो व्याख्यातः। देवकुलतडागारामाणां करणं स्थलीनामग्निचैत्या
नां च निबन्धनं गोसहस्राणां पात्रान्तरितं ब्राह्मणेभ्यो दानं देवतानां च पूजोपहारप्रवर्तनं तद्व्ययसहिष्णोर्वा धनस्य प्रतिग्रहणमित्यु
त्तमगणिकानां लाभातिशयः। सर्वालंकारलाभः गृहस्योदारस्य करणं महार्हैर्भाण्डैः परिचारकैश्च गृहपरिच्छदस्योज्ज्वलतेति रूपा
जीवानां लाभातिशयः। नित्यं शुक्लमाच्छादनमपेयमन्नं नित्यं सौगन्धिकेन ताम्बूलेन च योगः। सहिरण्यभागमलंकरणमिति कुं
भदासीनां लाभातिशयः। एतेन प्रदेशेन मध्यमाधमानामपि लाभान्योजयेदित्याचार्याः। देशकालविभवसामर्थ्यानुरागलोक
प्रवृत्तिवशादनियतलाभानां नियमप्रवृत्तिरिति वात्स्यायनः। गम्यमन्यतो निवारयितुकामा शक्तमन्यस्यामनुरक्तमपहर्तुकामा अन्यां
वा तस्मान्निर्मोक्ष्यमाणा गम्यसंसर्गादात्मनः स्थानं वृद्धिमायतिमभिगम्यतां च मन्यमाना अनर्थप्रतीकारे वा साहाय्यमेनं कारयितुकामा
सक्तस्य वान्यस्य लाभार्थिनी पूर्वोपकारमकृतमिव पश्यन्ती केवलप्रसृतार्थिनी वा कल्याणबुद्धिरल्पमप्यर्थं प्रतिगृह्णीयात्। आयत्यर्थिनी
तु समाश्रितानर्थप्रतीकारार्थिनी नैनं प्रतिगृह्णीयात्। त्यक्ष्याम्येनमन्येन प्रतिसंधास्यामि गमिष्यत्ययं स्वदारैर्योक्ष्यते नाशयिष्यत्य

माधुकुशलमुत्तरः। अस्मिंस्त्यागमिष्यति स्वामी पिता वा। स्थानभ्रंशो वा भविष्यति चलचित्तश्चेति मन्यमाना तदंतेन स्माल्लाभमिच्छे
त्। अभिसार्... मीश्वरेण प्रतिग्रहं लप्स्यति। अधिकरणस्थानं वा प्स्यति। वृत्तिकालो वा स्यादस्य वहनमस्यागमिष्यति स्वामा लप
त्रं वा। सस्यमस्य पक्ष्यते तस्मिन् नूद्दयमिति नित्यमविसंवादो वेलायामिति छेत्तापरिग्रहत्वं वास्याचरेत्। लब्धाधिगतवित्ता श्च राज
वाल्लभ्यमितवान्। आयसां च न दातव्य हरादेवं विसर्जयेत्। अनर्थविवर्तनेयेषागमनेभ्युदयस्तथा। अयत्नेनैवमास्त्र वा सापदेशाम
नुक्रमेत्। प्रेम्णापि च प्रयत्नं निस्वलेप्यगणितं वस्तु। स्थूललक्षान्महोत्साहां स्तानुगच्छेत्तैरपिव्यये॥ ॥इति श्रीवैशिके षष्ठेऽधि
करणे पंचमोध्यायः॥ ॥लाभविशेषाः॥ ॥आदितस्त्रयस्त्रिंशः॥ ॥अर्थमाचर्यमाणमनर्थानप्यनुबध्नंतीति तेषामनुबंधाः
नसंशयाश्चाने हि बुद्धिदौर्बल्यादतिरागादत्यभिमानादतिदंभादतिहर्षादतिविस्रंभादत्यार्जवादतिविश्वासादतिक्रोधादतिप्रसादाद
तिमहादतिसाहसाद्दैवयोगाच्च यदृच्छयासुः। तेषां फलं कृतस्य व्ययस्य निःफलत्वमनायतिरागमिष्यतोप्यर्थस्य निवर्तनं। आप्तस्य राम
निःक्रमणं पारुष्यप्राप्तिर्गम्यता शरीरस्य प्रतीघातः केशानां छेदनं पातनं। अंगवैकल्यापत्तिस्तस्मात्तानादित एव परिजिहीर्षेत्। ४९

अर्थभूयिष्ठांश्चापेक्षेत। अर्थो धर्मः काम इति अर्थत्रिवर्गः। अनर्थोऽधर्मो द्वेष इत्यनर्थत्रिवर्गः। तेषु चर्यमाणेषु अन्यस्यापि नि
ष्पत्तिरनुबंधः। संदिग्धायां तु फलप्राप्तौ स्याद्वा न वेति शुद्धसंशयः। [illegible] इदं वा स्यादिदं वेति संकीर्णः। एकस्मिन् क्रिय
माणे कार्यद्वयस्योत्पत्तिरुभयतोयोगः। समंततः उत्पत्तिः समंततोयोग इति। तानुदाहरिष्यामः। विचारितरूपोऽर्थत्रिवर्गः। तद्विप
रीत एवानर्थत्रिवर्गः। यस्योत्तमस्य याऽसौ प्रत्यक्षतोऽर्थलाभो ग्रहणीयत्वमापनेरागमः प्रार्थनीयत्वं चान्येषां स्यात् सोऽर्थोऽर्थानुबंधः।
लाभमात्रे कस्यचिदन्यस्यानागमने सोऽर्थो निरनुबंधः। अन्यार्थप्रतिग्रहे सक्तादायतिच्छेदनं वा तस्य वा निःक्रमणं लोकविद्विष्टस्य
नीचस्य वा गमनमायतिघ्नमित्यनर्थोऽर्थानुबंधः। स्वेन व्ययेन शूरस्य महामात्रस्य प्रभवतो वा लुब्धस्य निःफलमपि गमनं व्यस
नप्रतीकारार्थं महतश्चार्थघ्नस्य निमित्तस्य प्रशमनमायतिजननं वा सोऽनर्थोऽर्थानुबंधः। कदर्यस्य सुभगमानिनः कृतघ्नस्य वाति
संधानशीलस्य तैरपि व्ययैस्तथाराधनमंते निःफलमनर्थो निरनुबंधः। तस्यैव राजवल्लभस्य क्रौर्यप्रतापाधिकस्य तथैवा
राधनमंते निःफलं निःकाशनं च दोषकरं सोऽनर्थोऽनर्थानुबंधः। एवमन्यानपि धर्म्मकामयोरनुबंधान् योजयेत्। परस्परेण

च मुख्यात्तं क्रिरेदिसनुबंधाः। पक्षिणो क्षिणोपि दद्यान्नवेत्यर्थसंशयः। निःपीडितार्थफलमुत्सृज्यं त्याधर्मः स्यान्नवेति धर्मसंशयः।
अभिप्रेतमनुपलभ्य परिचारकमन्यं वा क्षुद्रं वागता कामः स्याद्धानवेति कामसंशयः। प्रभाववानूक्षुद्रोऽनभिमतोनर्थं करिष्य
न ति न वेत्यर्थसंशयः। अत्यंत निःफलं सक्तं त्यक्त्वा लोकं ध्यायात्तत्राधर्मः स्यान्नवेत्यधर्मसंशयः। रागस्याविवक्षायामभिप्रेतमनुपल
भ्य द्वेषः स्यान्नवेति द्वेषसंशयः। इति शुद्धसंशयाः। अथ संकीर्णाः। आगंतोरविदितशीलस्य वल्लभसंश्रयस्य प्रभविष्णोर्वा समुप
स्थितस्याराधनमर्थो नर्थ इति संशयः। श्रोत्रियस्य ब्रह्मचारिणो दीक्षितस्य लिंगिनो वा मिनो वा मां दृष्ट्वा जातरागस्य मुमूर्षोर्मित्र
वाक्याद्दाक्षिण्याच्च गमनं धर्मोऽधर्म इति संशयः। लोकादेवाकृतप्रत्ययाद्गुणतो गुणतो वा मित्यनवेक्ष्य गमने कामो द्वेष इति संश
यः। संकीर्णत्वं परस्परेणेति संकीर्णसंशयाः। यत्र परस्याभिगमने अर्थः सकाशाच्च संहर्षः स उभयतोर्थः। यत्र परस्य स्वेन येन निः वै
फलगमनं सकाशाच्चामर्षिताद्धितप्रत्यादानं तदुभयतोनर्थः। यस्याभिगमनेर्थो भविष्यति न वेत्यशंकायां सक्तोपि संहर्षाद्दास्यति राम
वा न वेति स उभयतोऽर्थसंशयः। यस्याभिगमने व्ययवति पूर्वो निरूढः क्रोधादपकारं करिष्यति न वेति संशयः। शक्तोनामर्षितो ५०

दत्तं प्रत्यादास्यति न वेति स उभयतोऽनर्थसंशयः। इत्यौद्दालकिरुभयतोयोगाः। बाभ्रवीयास्तु यस्याभिगमने [illegible]
र्थो नाभिगमने च सकाशादर्थः स उभयतोर्थः। यस्याभिगमने निःफलो व्ययो नभिगमने च निःप्रतीकारोनर्थः स उभयतोनर्थः। यस्या
भिगमने व्ययो दास्यति न वेति संशयोऽनभिगमने च सक्तो दास्यति न वेति उभयतोनर्थसंशयः। यस्याभिगमने व्यय पूर्वनिरूढो
विरुद्धः प्रभाववान् प्रत्यादास्यति न वेति संशयोऽनभिगमने च क्रोधादनर्थं करिष्यति न वेत्युभयतोऽनर्थसंशयः। अन्यतोनर्थोन्य
तोनर्थसंशयः। अन्यतोर्थो[illegible] अन्यतोनर्थसंशयः। अन्यतोनर्थोऽन्यतोनर्थसंशयः। एतेषामेव व्यतिरेकेन्यतोर्थसंशयोऽ
न्यतोनर्थसंशयः इति षट् संकीर्णा योगाः। तेषु सहायैः सह विमृश्य यतोर्थभूयिष्ठोर्थसंशयो गुरुरनर्थप्रशमो वा ततः प्रवर्तेत॥
र धर्मकामावपि अनेनैव प्रकारेणोदाहरेदेकैकशः संकीर्णत्व परस्परेण व्यतिषंजयेदित्युभयतोयोगाः। संभूय च विटाः परिगृह्णन्ति या
मेकां स गोष्ठीपरिग्रहः। सा तेषामितस्ततः संसृज्यमाना प्रत्येकं स संहर्षमर्थमभिवर्त्तयेत्। वसंतादिषु च योगे मनोरथमि
मं संपादयिष्यति तस्यागमिष्यति दुहितेति माता रोचयेत्। तेषां च संहर्षे माभिगमने कार्याण्युपलक्षयेत्। एकतोर्थः सर्वतो

नर्थस्सर्वतोनर्थमु[illegible]भयतोऽर्थमितोऽर्थमितिसमन्ततोयोगाः ॥ उभयतोर्थसंशयमनर्थसंशयं वा प्रत्ववियोजयेत्संकिरेन्न वा
था धर्मकामावपीति ॥ अर्थानर्थानुबंधसंशयविचाराः ॥ कुंभदासी । परिचारिका । कुलटा । स्वैरिणी । नटी । शिल्पकारिका । प्रका
शविनष्टा । रूपाजीवा । गणिका वेश्या चेति वेश्याविशेषाः ॥ सर्वासां चानुरूपेण गम्याः सहायाः तदनुरंजनं । अर्थागमोपायाः
निःसारणं पुनःसंधानं । अर्थानर्थानुबंधसंशयविचाराद्इति वैशिकं ॥ रत्यर्थाः पुरुषायेन रत्यर्थाश्चैव योषितः । शास्त्रस्यार्थप्र
धानत्वात्तेन योगोत्र योषितां ॥ संति रागपरा नार्यः संति चार्थपरा अपि । प्रागत्र वर्णितो रागो वेश्यायोगस्तु वैशिके ॥ ॥ इति वैशि
के षष्ठेधिकरणे षष्ठोध्यायः ॥ ॥ अर्थानर्थानुबंधसंशयविचाराः वेश्याविशेषाश्चेति ॥ ॥ आदितश्चतुस्त्रिंशः ॥ ॥ समाप्तं
चैवैशिकं षष्ठमधिकरणं ॥ ॥ ६ ॥ ॥ व्याख्यातं च कामसूत्रं तंत्रेणोक्तैस्तु विधिभिरभिप्रेतमर्थमनधिगच्छन्नौपनिषदिकमा
चरेत् ॥ रूपेगुणवयस्त्यागइतिसुभगंकरणं ॥ तगरकुष्ठतालीसपत्रकानुलेपनं सुभगंकरणं ॥ एतैरेवसुपिष्टैर्वर्तिमालिप्याक्ष राम
तैलेन नरकपाले साधितमंजनं च ॥ पुनर्नवासहदेवीसारिवाकुरंटोत्पलपत्रैश्च सिद्धं तैलमभ्यंजनं ॥ तद्युक्ता एव स्रजश्च ॥ पद्मोत्प ५०

नागकेसराणां शोषितानां चूर्णं मधुघृताभ्यामवलिह्य सुभगो भवति ॥ तान्येव तगरतालीसतमालपत्रयुक्तान्यनुलेपनं ॥ मयू
रस्याक्षि तरक्षोर्वा सुवर्णेनालिप्य दक्षिणहस्तेन धारयेदिति सुभगंकरणं ॥ तथा बादरं मणिं च तेषु चाथर्वणान्योगान्नाम ये शंखमणिं
त । विधानं तान्त्रविधायोगात्प्राप्तयौवनां परिचारिकां स्वामी संवत्सरमात्रमन्यतो धारयेत् ॥ ततो वारितां बालां मत्वा लालसी
भूतेषु गम्येषु योस्याः संहर्षेण बहु दद्यात्तस्मै विसृजेदिति सौभाग्यवर्द्धनं ॥ गणिका प्राप्तयौवनां स्वां दुहितरं तस्या विज्ञानशील
रूपानुरूप्येण तानभिनिमंत्र्य सारेण योस्या इदमिदं च दद्यात्स पाणिं गृह्णीयादिति संसाध्य रक्षयेदिति ॥ सा च मातुरविदिता
नाम नागरिकपुत्रैर्धनिभिरत्यर्थं प्रीयेत तानेषां कलाग्रहणे गंधर्वशालायां भिक्षुकी भवने तत्र तत्र च संदर्शनयोगाः ॥ तेषां श्री
तदार्थिनां माता पाणिं ग्राहयेत् ॥ तत्रावदर्थमलभमाना तु स्वेनाप्येकदेशेन दुहितुरेतद्दत्तमनेनेति ख्यापयेत् ॥ प्रच्छन्नं वा तैः सं
योज्य स्वयमजानती भूत्वा ततो विदितेष्वेवं धर्मस्थेषु निवेदयेत् ॥ सख्यैव तु दास्या वा मोचितकन्याभावां सुपरिगृहीतकामसूत्राभ्या
भ्यासिकेषु योगेषु प्रतिष्ठितां प्रतिष्ठितवयसि सौभाग्ये च दुहितरमवसृजति गणिका इति प्राच्योपचाराः ॥ पाणिग्रहश्च संवत्स

रमच्चभिन्नायस्त्रिनोयथाकामिनीस्याद्हर्दुमपिसंवत्सराद्धिरलंनेननिमेत्यमाणंलाभमप्युत्सृज्यनारात्रिंतस्यागच्छेदिनिवे
यमायाःपाणिग्रहणविधिःसौभाग्यवर्द्धनंचाएतेनरंगोपजीविनांकन्याव्याख्याताःमस्यैनुनांरघुर्ग्गएषांनूयविशिष्टमुपक्रुयानि।
धत्तूरकमरीचपिप्पलीचूर्णैर्मधुमिश्रैर्लिप्तलिंगस्यप्रयोगोवशीकरणं।वानोड्डीनपत्रंसूनकंनिर्माल्यंमसूरास्थिचूर्णानवरणंवशी
करणं।सुपंसूनायामंडलकारिकायाश्चूर्णंमधुसंयुक्तंसहामलकैःस्नानंवशीकरणं।वज्रस्नुहीडकानिखंडशःकृतानिमनःशि गं
लागंधपाषाणचूर्णेनाभ्यज्यसप्तकृत्वःशोषितानिचूर्णयित्वामधुनालिप्तलिंगस्यसंप्रयोगोवशीकरणं।एतेनैवरात्रौधूमंकृत्वा
तद्धूमतिरस्कृतंसौवर्णंचंद्रमसंदर्शयति।एतैरेवचूर्णितैर्वानरपुरीषमिश्रितैर्याकन्यामवकिरेत्सानान्यस्मैनदीयते।वचागंडका
निसहकारतैललिप्तानिशिंशपावृक्षस्कंधमुत्कीर्यनिदध्यात्।ततःषड्भिर्मासैरपनीतानिदेवकांतमनुलेपनंवशीकरणंचेत्या
चक्षते।तथाखदिरसाराणिशकलानितनूनियेनवृक्षमुत्कीर्यबिल्वंनिदध्यात्।तत्पुष्पगंधाभिभवेदितिगांधर्वकांतमनुलेपनंव राम
शीकरणंचेत्याचक्षते।प्रियंगवस्तगरमिश्राःसहकारतैलदिग्धानागकेसरवृक्षमुत्कीर्यबिल्वमासनिहितानागकांतमनुलेप ५२

नंवशीकरणमित्याचक्षते।उष्ट्रस्यास्थिभृंगराजरसेनभावितंदग्धमंजनंसुष्ठस्यास्थ्यनिकायांनिहितंउष्ट्रास्थिशलाकयैवस्रो
तोंजनंसहितंपुण्यंचक्षुष्यंवशीकरणंचेत्याचक्षते।एतेनश्वपेनभासमयूरास्थिमयान्यंजनानिव्याख्यातानि।उच्चटाकंदश्चव
ष्टामधुकंचसशर्करेणपयसापीतावृषोभवति।मेषवस्तमुष्कसिद्धस्यपयसःसशर्करस्यपानंवृषयोगः।तथाविकार्याःक्षीरि
कायाःस्वयंगुप्तायाश्चक्षीरेणपानं।तथाप्रियालबीजानांमोरटाक्षीरविदार्योश्चक्षीरेणैव।शृंगाटककसेरुमधूकानिक्षीरका
कोल्यासहपिष्टानिसशर्करेणपयसाघृतेनमंदाग्निनोत्कारिकांपक्त्वायावदर्थंभक्षितवाननंताःस्त्रियोगच्छतीत्याचक्षते।माष
कमलंधौतानांदुग्धेघृतेनमृदूकृतानांउद्धृतानांवृद्धवत्सायाःगोःपयःसिद्धंपायसंमधुसर्पिर्भ्यामशित्वानंताःस्त्रियोगच्छतीत्याचक्षते।विदारी
स्वयंगुप्ताशर्करामधुसर्पिर्भ्यांगोधूमचूर्णेनपोलिकांकृत्वायावदर्थंभक्षितवाननंताःस्त्रियोगच्छतीत्याचक्षते।चटकांडरसभावितै
स्तंडुलैःपायसंसिद्धंमधुसर्पिर्भ्यांप्लावितंयावदर्थमितिसमानंपूर्वेण।चटकांडरसभावितानांपगतत्वचांतिलानांशृंगाटककसेरुक
स्वयंगुप्ताफलानिगोधूममाषचूर्णैःसशर्करेणपयसासर्पिषाचापक्वंपायसंयावदर्थंप्राशितमितिसमानंपूर्वेण।सर्पिषोमधुन

शर्कराः मधुकस्य द्वे द्वे पले मधुरसायाः कर्षः प्रस्थे पयस इति षडंगममृतं मेध्यं वृष्यमायुष्यं युक्तरसमित्याचक्षते। शतावरीश्व
दंष्ट्रागुडकषाये पिप्पलीमधुकल्के गोक्षीरछागघृताभ्यां पक्वे तस्य पुष्यारंभेण अन्वहं प्राशनं मेध्यं वृष्यमायुष्यं युक्तरसमित्याचक्ष
ते। शतावर्याः श्वदंष्ट्रायाः श्रीपर्णीफलानां च क्षुण्णानां चतुर्गुणे जले पाक आ प्रकृत्यवस्थानात् तस्य पुष्यारंभेण प्रातः प्राशनं मेध्यं वृष्य
मायुष्यं युक्तरसमित्याचक्षते। श्वदंष्ट्राचूर्णसमन्वितं तत्सममेव यवचूर्णं प्रातरुत्थाय द्विपलिकमनुदिनं प्राश्नीयान् मेध्यं वृष्य
मायुष्यं युक्तरसमित्याचक्षते॥ आयुर्वेदाच्च वेदाच्च विधानेभ्य एव च। आप्तेभ्यश्चावबोद्धव्याः योगा ये प्रीतिकारकाः। न प्रयुंजी
त संदिग्धान्न शरीरात्ययावहान्। न जीवघातसंबद्धान्नाशुचिद्रव्यसंयुतान्। तथा युक्तान्प्रयुंजीत शिष्टैरपि न निंदितान्। ब्रा
ह्मणैश्च सुहृद्भिश्च मंगलैरभिनंदितान्॥ ॥ ॥ इत्यौपनिषदिके सप्तमेऽधिकरणे प्रथमोध्यायः॥ ॥ सुभगंकरणं वशीक
रणं वृष्याश्च योगाः॥ आदितः पंचत्रिंशः॥ ॥ चंडवेगां रंजयितुमशक्नुवन् योगानाचरेत्॥ रतस्योपक्रमे संबाधस्य करेणो काम
पमर्दनं तस्या रससंप्राप्तिकाले च रतयोजनमिति रागप्रत्यायनं। औपरिष्टकं मंदवेगस्य गतवयसो व्यायतस्य श्रांतस्य च रा ५३

न गप्रत्यायनं अपद्रव्याणि वा योजयेत्। तानि सुवर्णरजतताम्रकालायसगजदंतगवलद्रव्यमयानि। त्रापुषाणि सैसकानि च
मृदूनि शीतवीर्याणि वृष्याणि कर्मसहिष्णूनि भवंतीति बाभ्रवीया योगाः। दारुमयानि साम्यतश्चेति वात्स्यायनः। लिंगप्रमाणां
तरं बिंदुभिः कर्कशपर्यंतं बहुलं स्यात्। एत एव द्वे संघाटी। त्रिप्रभृति यावत्प्रमाणं वा चूडकः। एकामेव लतिकां प्रमाणवशेन वेष्ट
येदित्येकचूडकः। उभयतोमुखच्छिद्रः स्थूलकर्कशपृषद्गुटिकायुक्तः प्रमाणयोगी कट्यां बद्धः कंचुको जालकं वा। तदभावे अलाबू
नालकं वेणुश्च तैलकषायैः सुभावितः सूत्रबद्धः श्लक्ष्णकाष्ठमाला वा ग्रथिता बहुभिरामलकास्थिभिः संयुक्ता इत्यपविद्ध
स्य योगाः। न त्वपविद्धस्य व्यवहृतिरस्ति। दाक्षिणात्यानां लिंगस्य कर्णयोरिव व्यधनं बालकस्य। युवा तु शस्त्रेण छेदयित्वा यावद्रुधि
रस्यागमनं तावदुदके तिष्ठेत्। वैशद्यार्थं च तस्यां रात्रौ निर्बंधाद् व्यवायः। ततः कषायैरेकदिनांतरितं शोधनं। वेतसकुटजशंकुभिः क्रमे
ण वर्ध्यमानस्य वर्धनैर्बंधनं। यष्टीमधुकेन मधुयुक्तेन शोधनं। ततः सीसपत्रकर्णिकया वर्धयेत्। म्रक्षयेद्भल्लातकतैलेनेति व्यधनयो
गाः। तस्मिन्ननेकाकृतिविकल्पान्यपद्रव्याणि योजयेत्। वृत्तमेकतोवृत्तमुदूखलकं कुसुमकं कंटकितं कंकास्थि गजप्रहारिकमष्ट

मंडलिकं श्रंगरकशृंगाटकमन्यानि तउपायनः कर्मनिश्चावकुकर्मसहनाचैषां मृदुकर्कशानां यथासात्म्यमिति निष्टरागप्रत्यायन
नं। एवं वृक्षजानां जंतूनां शूकैरुपलिप्तं लिंगं दशरात्रं तैलेन मृदितं पुनः पुनरुपलिप्तं पुनः प्रमृदितमिति जातशोफं खट्वायामधो
मुखस्तदंतरेणालंबयेत्। ततः शीतैः कषायैः कृतवेदनानिग्रहं सोपक्रमेण निःपादयेत्। स यावज्जीवं शूकजो नाम शोफो विटानां॥
अश्वगंधाशवरकंदजलशूककृहतीफलमाहिषनवनीतहस्तिकर्णवज्रवल्लीरसैरेकैकेन परिमर्दनं मासिकं वर्द्धनं। एतैरेव कषा
यैः पक्वेन तैलेन परिमर्दनं षण्मास्यं। दाडिमत्रपुसबीजानि वालुककृहतीफलरसश्चेति मृदग्निना पक्वेन तैलेन परिमर्दनं परिषेको
वा। तांस्तांश्च योगानाप्तेभ्यो बुध्येत इति वर्द्धनयोगाः। स्नुहीकंटकचूर्णैः पुनर्नवावानरपुरीषलांगलिकामूलमिश्रैर्यामवकिरेत्ता
नान्यं कामयेत। तथा सोमलतावल्गुजभृंगलोहोपजिह्विकाचूर्णैर्व्याधिघातकजंबूफलरसनिर्यासेन घनीकृतेन लिप्तसंबाधां गच्छ
तो रागो नश्यति। गोपालिकाबहुपादिकाजिह्विकाचूर्णैर्माहिषतक्रयुक्तैः स्नातां गच्छतो रागो नश्यति। नीपाम्रातकजंबूकुसुम राम
युक्तमनुलेपनं दौर्भाग्यकरं स्रजश्च। कोकिलाक्षफलप्रलेपो हस्तिन्याः संहतमेकरात्रे करोति। पद्मोत्पलकंदसर्जकसुगंधचूर्णं ५४

मिश्रमधुना पिष्टानि लेपो मृग्या विशालीकरणं। स्नुहीसोमार्कक्षीरैर्वल्गुजाफलैर्भावितान्यामलकानि केशानां श्वेतीकरणं। मद
यंतिकाकुटजकवंजनिकागिरिकर्णिकाश्लक्ष्णपर्णीमूलैः स्नानं केशप्रत्यायनं। एतैरेव सुपक्वेन तैलेनाभ्यंगात्कृष्णीकरणं क्र
मेणास्य प्रत्यानयनं। श्वेताश्वस्य मुष्कस्वेदैः सप्तकृत्वो भावितेनालक्तकेन रक्तोऽधरः श्वेतो भवति। मदयंतिकादीन्येव प्रत्यानयनं। बहु
पादिकाकुष्ठतगरतालीसदेवदारुवज्रकंदकैरुपलिप्तं वंशं वादयतो या शब्दं शृणोति सा वश्या भवति। धत्तूरकफलयुक्तोऽभ्यवहारः
उन्मादकरः। गुडो जीर्णश्च प्रत्यानयनं। हरितालमनःशिलाभक्षिणो मयूरस्य पुरीषेण लिप्तहस्तो यद्द्रव्यं स्पृशति तन्न दृश्य
ते। आंगारतृणभस्मना तैलेन विमिश्रमुदकं क्षीरवर्णं भवति। हरीतक्याम्रातकयोः श्रवणप्रियंगुकाभिश्च पिष्टाभिर्लिप्तानि लो
हभांडानि ताम्रीभवंति। श्रवणप्रियंगुकातैलेन दुकूलसर्पनिर्मोकेन वर्तिना दीपं प्रज्वाल्य पार्श्वे दीर्घीकृतानि सर्पवद्रूपाणि दृश्यंते। श्वेतायाः
श्वेतवत्साया गोः क्षीरस्य पानं यशस्यमायुष्यं। ब्राह्मणानां प्रशस्तानामाशिषः। पूर्वशास्त्राणि संहृत्य प्रयोगानुपसृत्य चा। का
[illegible]मिदं यत्नात्संक्षेपेण निवेशितं। धर्ममर्थं च कामं च प्रत्ययं लोकमेव च। पश्यत्येनस्य तत्त्वज्ञो न च रागात्प्रवर्तते। अधिकार
ते

॥ दुर्भाग्ये निहताः रागवर्द्धनाः॥ न देनेनरस्मैत्रेवनेयस्ताहिनिवारिताः॥ न शास्त्रमस्तीत्येतेन प्रयोगो हि समीक्ष्यते॥ शास्त्रार्थान्व्यापि
दनां विद्यात्प्रयोगांस्त्वेकदेशिकान्॥ बाभ्रवीयांश्च सूत्रार्थानागमं सुविमृश्य च॥ वात्स्यायनश्चकारेदं कामसूत्रं यथाविधि॥ नदेनद्ब्र
चर्येण परेण च समाधिना॥ विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधिः॥ रक्षेद्धर्मार्थकामानां स्थितिं स्वां लोकवर्तिनीं॥ अस्य शास्त्रस्य
नत्त्वज्ञो भवत्येव जितेन्द्रियः॥ नदेतत्कुशलो विद्वान्धर्मार्थाववलोकयन्॥ नातिरागात्मकः कामी प्रयुञ्जानः प्रसिध्यति॥ ॥७॥ ॥इति
श्रीवात्स्यायनीये कामसूत्रे औपनिषदिके सप्तमेऽधिकरणे द्वितीयोऽध्यायः॥ ॥नष्टरागप्रत्यानयनं वृद्धिविधयश्चित्राश्च योगाः
आदितः षट्त्रिंशः॥ ॥समाप्तं चेदमौपनिषदिकं सप्तममधिकरणं॥ ॥शुभमस्तु॥ ॥समाप्तश्चायं ग्रंथः॥ ॥श्रीरस्तु॥

राम
५५०